Similar to the above. Considered also to have the power to propitiate Dakṣiṇāmūrti or Śiva.

Beginning :

अस्य श्रीअरण्येश्वरवश्यश्रीवनदुर्गात्रिपुरसुन्दरीपरमेश्वरीस्तोत्रमहामन्त्रस्य अरण्येश्वर ऋषिः, अत्यनुष्टुप् छन्दः, अन्तर्यामिनारायणी किरातधरवनदुर्गा ईश्वरी देवता ; दुं बीजं, ह्रीं शक्तिः, क्रों, कीलकं, श्रीदाक्षिणामूर्तिप्रसादसिद्ध्यर्थे जपे विनियोगः ।

End :

तन्मे भगवति दुर्गे शमय स्वाहा । श्रीवनदुर्गादेवीश्रीपादुकां पूजयामि ॥

No. 7165. वनदुर्गामन्त्रः.
VANADURGĀMANTRAḤ.

Pages, 2. Lines, 9 on a page.

Begins on fol. 6*a* of the MS. described under No. 6548, wherein it is given as Vanadurgāmahāmantra in the list of other works.

Complete.

Similar to the above.

Beginning :

अस्य वनदुर्गामहामन्त्रस्य आरण्यकभगवान् ऋषिः, अनुष्टुप् छन्दः, वनदुर्गा परमेश्वरी देवता, दुं बीजं, स्वाहा शक्तिः, मम सर्वाभीष्टसिद्ध्यर्थे वनदुर्गाप्रसादसिद्ध्यर्थे जपे विनियोगः ।

End :

मौलौ चन्द्रकलावती मनसि मे(च)श्रीकण्ठचिन्तावती
गाने दिव्यसुधावती करतले कल्याणवीणावती ।
कण्ठे हारलतावती कचभरे कादम्बमालावती
दृष्टौ पूर्णकृपावती दिशतु नश्श्रेयांसि सा पार्वती ॥
ओं वाराह्यै नमः, श्रीसरस्वत्यै नमः, अम्बिकायै नमः ॥

No. 7166. वनदुर्गामन्त्रः.
VĀNADURGĀMANTRAḤ.

Pages, 3. Lines, 6 on a page.

Begins on fol. 28*a* of the MS. described under No. 2421.

Complete.

Similar to the above.

Beginning :

हेमप्रख्यामिन्दुखण्डार्धमौलिं शङ्खारिष्टाभीतिहस्तां त्रिनेत्राम् ।
हेमाब्जस्थां पीतवस्त्रां प्रसन्नां देवीं दुर्गां दिव्यरूपां नमामि ॥

अस्य श्रीवनदुर्गापरमेश्वरीमहामन्त्रस्य अरण्य ऋषिः, अनुष्टुप् छन्दः, वनदुर्गा परमेश्वरी देवता; दुं बीजं, ह्रीं शक्तिः, स्वाहा कीलकं, वनदुर्गाप्रसादसिद्ध्यर्थे जपे विनियोगः ।

End:

उत्तिष्ठ पुरुषि किं स्वपिषि भयं मे समुपस्थितं यदि शकचम-शकचं वा तन्मे भगवति शमय स्वाहा ॥

No. **7167.** वनदुर्गामन्त्रः.

VANADURGĀMANTRAḤ.

Pages, 3. Lines, 6 on a page.

Begins on fol. 56*a* of the MS. described under No. 5639.

Complete.

Similar to the above. The repetition of this Mantra is considered to have the power to promote one's health, wealth and prosperity.

Beginning:

शरदिन्दुविकासमन्दहासां स्फुरदिन्दीवरलोचनाभिरामाम् ।
अरविन्दसमानसुन्दरास्यामरविन्दासनसुन्दरीमुपासे ॥

* * * *

एवंगुणविशेषणविशिष्टायामस्यां तिथौ अस्माकं सहकुटुम्बानां क्षेमस्थैर्यायुरारोग्यैश्वर्याभिवृद्ध्यर्थं मम . . . वनदुर्गामहाविद्या-पूजापारायणं करिष्ये—

अस्य श्रीवनदुर्गामहामन्त्रस्य अरण्येश्वर ऋषिः शिरसि, अनुष्टुप् छन्दः मुखे, अन्तर्यामिनारायणाकिरातरूपधरेश्वरी श्रीवनदुर्गा महात्रिपुर-सुन्दरी देवता हृदि, दुं बीजं, ह्रीं शक्तिः, क्रों कीलकं, वनदुर्गाप्रसा-दासिद्ध्यर्थे जपे विनियोगः ।

End:

श्रीं ह्रीं क्लीं उत्तिष्ठ पुरुषि किं स्वपिषि भयं मे समुपस्थितं . . अष्टाविंशतिवारं जपित्वा ।

सह नाववतु । सह नौ भुनक्तु । सह वीर्यं करवावहै । तेजस्विना-वधीतमस्तु मा विद्विषावहै । ओं शान्तिः शान्तिः शान्तिः इति त्रिः ॥

No. 7168. वनदुर्गामहाविद्यापारायणम्.
VANADURGĀMAHĀVIDYĀPĀRĀYAṆAM.

Pages, 2. Lines, 8 on a page.

Begins on fol. 102*a* of the MS. described under No. 124, wherein it is given as Mahāvidyā.

Complete.

This Mantra is addressed chiefly to Vanadurgā, although it contains also the Pāśupatāstramantra and Śarabhasāluva-gāyatrī-mantra. It is called Mahāvidyā and is intended to enable one to secure the favour of Vānadurgā.

Beginning :

वन्दे गुरुपदद्वन्द्वमवाङ्मनसगोचरम् ॥
रक्तशुक्लप्रभामिश्रमतर्क्यं त्रैपुरं महः ॥

* * * *

पूर्वोक्तैवङ्गुणविशेषणविशिष्टायां शुभतिथौ वनदुर्गामुद्दिश्य वनदुर्गा-प्रीत्यर्थं महाविद्यापारायणं करिष्ये—

ओं ऐं ह्रीं श्रीं द्रां सङ्क्षोभणमुद्रायै नमः, ओं श्रीं ह्रीं द्रीं सम्मोहनमुद्रायै नमः ।

End :

ओं दुं ऐं श्रीं ह्रीं क्लीं दुं ओं उत्तिष्ठ पुरुषि किं स्वपिषि भयं मे समुपस्थितं यदि शक्यमशक्यं वा तन्मे भगवति शमय स्वाहा ॥

No. 7169. वनदुर्गामहाविद्यापारायणम्.
VANADURGĀMAHĀVIDYĀPĀRĀYAṆAM.

Pages, 8. Lines, 7 on a page.

Begins on fol. 11*a* of the MS. described under No 7156.

Complete.

Same as the above.

No. 7170. वनदुर्गामहाविद्यामन्त्रः.
VANADURGĀMAHĀVIDYĀMANTRAḤ.

Page, 1. Lines, 19 on a page.

Begins on fol. 45*b* of the MS. described under No. 2886.

Complete.

Similar to the above.

Held also to be efficacious in causing harm to one's enemies in various ways.

Beginning:

अस्य वनदुर्गामहाविद्यामन्त्रराजस्तोत्रमहामन्त्रस्य ईश्वर ऋषिः, अनुष्टुप् छन्दः, अन्तर्यामी नारायणः किरातरूपधर ईश्वरो देवता; दुं बीजं, स्वाहा शक्तिः, क्लीं कीलकं, मम प्रतिकूलकारिणो ये ये स्थानेषु स्थिताः, तेषां पशुपुत्रमित्रकलत्रसंहारणार्थं . . . . . वनदुर्गामहाविद्याप्रीत्यर्थं वनदुर्गामहाविद्यामन्त्रजपं करिष्ये.

End:

ओं ह्रीं दुं उत्तिष्ठ पुरुषि किं स्वपिषि भयं मे समुपस्थितं यदि शक्यमशक्यं वा तन्मे भगवति शमय स्वाहा॥ पञ्चपूजा॥

No. 7171. वनदुर्गामहाविद्यामन्त्रः.
VANADURGĀMAHĀVIDYĀMANTRAḤ.

Pages, 4. Lines, 4 on a page.

Begins on fol. 174*a* of the MS. described under No. 29, wherein it is given under the name Vanadurgāstōtra.

Complete.

Similar to the above.

Beginning:

अस्य श्रीमहाविद्यावनदुर्गास्तोत्रमन्त्रराजस्य अरण्येश्वर ऋषिः, अत्यनुष्टुप् छन्दः, ह्रीं अन्तर्यामिनारायण[:] किरातरूपधरेश्वरी वनदुर्गा देवता, ओं दुं बीजं, स्वाहा शक्तिः, ह्रीं कीलकं, श्रीमहाविद्यावनदुर्गादेवताप्रसादसिद्ध्यर्थे जपे विनियोगः।

See under the previous number for the end

No. 7172. वनदुर्गामहाविद्यामन्त्रः.

VANADURGĀMAHĀVIDYĀMANTRAḤ.

Pages, 2. Lines, 20 on a page.

Begins on fol. 41*a* of the MS. described under No. 5574.

Complete.

Similar to the above.

Beginning:

श्रीनाथादिगुरुत्रयं गणपतिं दुर्गां वटुकां शिवमच्युतम् ।
ब्रह्माणीं गि(रि)जां लक्ष्मीं वाणीं वन्दे विभूतये ॥

* * * *

अस्य श्रीमहाविद्यावनदुर्गात्रिपुरसुन्दरीपरमेश्वरीमहामन्त्रस्य अरण्येश्वर ऋषिः, अत्यनुष्टुप् छन्दः, अन्तर्यामिनारायण[:]किरातरूपधरवनदुर्गा ईश्वरी देवता ; दुं बीजं, ह्रीं शक्तिः, क्रों कीलकं, मम श्रीवनदुर्गामहाविद्याप्रसादसिद्ध्यर्थे जपे विनियोगः ।

End:

तन्मे भगवति दुर्गे शमय शमय स्वाहा ॥

No. 7173. वनदुर्गामहाविद्यामन्त्रः.

VANADURGĀMAHĀVIDYĀMANTRAḤ.

Pages, 3. Lines, 20 on a page.

Begins on fol. 25*a* of the MS. described under No. 5574.

Complete.

Similar to the above.

Beginning:

श्रीनाथादिगुरुत्रयं गणपतिं पीठत्रयं भैरवं
सिद्धौघं वटुकत्रयं पदयुगं दूतिक्रमं मण्डलम् ।
वीराद्यष्टचतुष्कषष्टिनवकं वीरावलीपञ्चकं
श्रीमन्मालिनिमन्त्रराजसहितं वन्दे गुरोर्मण्डलम् ॥

अस्य श्रीवनदुर्गामहाविद्यामहामन्त्रस्य अरण्येश्वर ऋषिः, अत्यनुष्टुप् छन्दः, अन्तर्यामिनारायण[:]किरातरूपधारिणी ईश्वरी वनदुर्गा

देवता; दुं बीजं, ह्रीं शक्तिः, क्रों कीलकं, मम वनदुर्गाप्रसादसिद्ध्यर्थे जपे विनियोगः ।

See under the previous number for the end.

No. 7174. वनदुर्गामहाविद्यामन्त्रः.
VANADURGĀMAHĀVIDYĀMANTRAḤ.

Pages, 2. Lines, 9 on a page.

Begins on fol. 37*a* of the MS. described under No. 21, wherein it is given as Vanadurgāmahālaksmīmantra.

Complete

Similar to the above.

Held to be helpful in the accomplishment of the four Puraṣārthas or principal aims of life, viz., Dharma, Artha, Kāma and Mōkṣa

Beginning:

अस्य श्रीवनदुर्गामहाविद्यास्तोत्रराजमहामन्त्रस्य ईश्वर ऋषिः, अनुष्टुप् छन्दः, अन्तर्यामिकिरातरूपधरईश्वरी महाविद्या वनदुर्गा देवता; दुं बीजं, ह्रीं शक्तिः, स्वाहा कीलकं, मम धर्मार्थकाममोक्षचतुर्विधपुरुषार्थसिद्ध्यर्थे जपे विनियोगः । मूलमन्त्रेण प्राणायामत्रयं कृत्वा, मूलेन करशुद्धिं कृत्वा

End:

सह नाववतु—ओं शान्तिः शान्तिः ओं । उत्तिष्ठ पुरुषि किं स्वपिषि भयं मे समुपस्थितं यदि शक्यमशक्यं वा तन्मे भगवति शमय स्वाहा ॥

No. 7175. वनदुर्गामहाविद्यामन्त्रः.
VANADURGĀMAHĀVIDYĀMANTRAḤ.

Pages, 3. Lines, 7 on a page.

Begins on fol. 71*b* of the MS. described under No. 5639, wherein it is found included in the Mahāvidyā 58*a*, given in the list of other works.

Complete.

Similar to the above.

The transcription of this manuscript is said to have been completed by Cennubhaṭla Bhavānīśaṅkara on Wednesday, the 2nd of the bright fortnight of the month of Caitra, in the year Bhava, and the transcript handed over to the brother of Appayya of the Koleina family.

Beginning :

पूर्णमदः पूर्णमिदं . . . पूर्णमेवावशिष्यते ॥

पुनः षडङ्गन्यासः ।

अस्य श्रीवनदुर्गामहामन्त्रस्य अरण्येश्वर ऋषिः, अत्यनुष्टुप् छन्दः, अन्तर्यामिनारायणकिरातरूपधरेश्वरी श्रीवनदुर्गा महात्रिपुरसुन्दरी देवता ; दुं बीजं, ह्रीं शक्तिः, क्रों कीलकं, मम श्रीवनदुर्गामम(हा)त्रिपुरसुन्दरी-प्रसादसिद्ध्यर्थे जपे विनियोगः ।

End:

मनुः । इति वामहस्तेन जलं दद्यात् । अनेन श्रीवनदुर्गामहा-विद्यापारायणेन भगवती सर्वात्मिका श्रीवनदुर्गा देवता सुप्रीतस्सु(ता सु)-प्रसन्नो(न्ना) वरदो(दा) भवतु ॥

No. 7176. वनदुर्गामहाविद्यामालामन्त्रः.

VANADURGĀMAHĀVIDYĀMĀLĀMANTRAḤ

Pages, 19. Lines, 7 on a page.

Begins on fol. 59*a* of the MS. described under No. 235, wherein it is given as Mahāvidyā in the list of other works.

Complete.

This Mantra is also addressed to Vanadurgā. It contains also other connected Mantras which are considered to be accessories to the Vanadurgāmantra Its repetition is believed to be efficacious in enabling one to destroy one's enemies.

Beginning :

हेतुकं पूर्वपीठे तु आग्नेय्यां त्रिपुरान्तकम् ।
दक्षिणे चाग्निवेतालं नैरृत्यां यमजिह्विकम् ॥

* * * *

ओं ह्रीं श्रीं सकलनरमुखभ्रमरीं, ओं क्लीं ह्रीं सकलराजमुखभ्रमरीं, ओं क्रों सौः सकलदेवतामुखभ्रमरीं, ओं क्लीं ह्रीं सकलकामिनीमुखभ्रमरीं, ओं ऐं सौः सकलदेशमुखभ्रमरीं, ओं ह स ख फ्रें त्रैलोक्यचित्तभ्रमरीं, . . . मम वाञ्छितार्थाकर्षिणीं परमकल्याणीं महायोगिनीं महाविद्याम् ।

End:

ओं ब्लूं ह्रीं श्रीब्रह्मकोशाधि(द्धि)मां रक्ष रक्ष हुं फट् स्वाहा । उ त्वा मदन्तु स्तोमाः कृणुष्व राधोऽद्रिवः । अव ब्रह्म द्विषो जहि । श्रीवनदुर्गार्पणमस्तु ॥

No. 7177. वनदुर्गामहाविद्यामालामन्त्रः.

VANADURGĀMAHĀVIDYĀMĀLĀMANTRAḤ.

Pages, 13. Lines, 9 on a page.

Begins on fol. 37*b* of the MS. described under No. 21, wherein it has been omitted to be included in the list of other works given therein. Rākṣasadigbandhana stated therein as beginning on 40*a* is found merged in this Mantra.

Complete.

Similar to the above.

See under the previous number for the beginning.

End:

अव ब्रह्म द्विषो जहि । सह नाववतु—द्विषावहै । ओं शान्तिश्शान्तिश्शान्तिः . . . . . .

निर्याणमुद्रादेवतार्पणं यथासुखं विहरेत् ॥

दध्यन्नं क्षीरमिश्रं च सघृतं गुडपूपकम् ।
कदलीपनसाम्रं च मधु मध्वन्नकं तथा ॥

Colophon:

महाविद्या सम्पूर्णा ॥

No. 7178. वनदुर्गामहाविद्यामालामन्त्रः.

VANADURGĀMAHĀVIDYĀMĀLĀMANTRAḤ.

Pages, 29. Lines, 7 on a page.

Begins on fol. 57*b* of the MS. described under No. 5639, wherein it is given as Mahāvidyā 58*a*.

Complete.

Similar to the above.

See under No. 7176 for the beginning.

End:

दुं दुर्गायै नमः—दुर्गां देवीं शरणमहं प्रपद्ये सुतरसि तरसे नमः । अव ब्रह्म द्विषो जहि । सह नाववतु . . मा विद्विषावहै । ओं शान्तिश्शान्तिश्शान्तिः—इति त्रि ॥

No. 7179. वनदुर्गामहाविद्यामालामन्त्रः.

VANADURGĀMAHĀVIDYĀMĀLĀMANTRAḤ.

Pages, 31. Lines, 4 on a page.

Begins on fol. 176*a* of the MS. described under No. 29, wherein it has been included in Vanadurgāstōtra 174*a*.

Complete.

Similar to the above.

See under No. 7176 for the beginning.

End:

घृणिस्सूर्य आदित्यों श्रीं सहस्रार हुं फट् स्वाहा । अव ब्रह्म द्विषो जहि । उत्तरन्यासः । लं पृथिव्यादिपञ्चपूजां कृत्वा निर्याणमुद्रां प्रदर्शयेत् ॥

Colophon:

श्रीमहाविद्या सम्पूर्णा ॥

No 7180. वनदुर्गामहाविद्यामालामन्त्रः.

VANADURGĀMAHĀVIDYĀMĀLĀMANTRAḤ.

Pages, 42. Lines, 20 on a page.

Begins on fol. 42*a* of the MS. described under No. 5574, wherein it is included in Vanadurgāmahāvidyā 41*a*.

Complete.

Similar to the above.

For the beginning, see under No. 7176.

End:

सद्यो जातं प्रपद्यामि सदाशिवों । नमो हिरण्यबाहवे सेनान्ये दिशां च पतये नमो नमो वृक्षेभ्यो हरिकेशेभ्यः पशूनां पतये नमो नमः ।

मातर्मे मधुकैटभाग्नि महिषप्राणापहारोद्यमे
हेलानिर्मितधूम्रलोचनवधे हे चण्डमुण्डार्दिने(नि) ।
निश्शेषीकृतरक्तबीजदनुजे नित्ये निशुम्भापहे
शुम्भध्वंसिनि संहराशु दुरित दुर्गे नमस्तेऽम्बिके ॥

सह नाववतु . . मा विद्विषावहै । ओं शान्तिश्शान्तिश्शान्तिः ॥

No. 7181. वनदुर्गामहाविद्यामालामन्त्रः.

VANADURGĀMAHĀVIDYĀMĀLĀMANTRAḤ.

Pages, 23. Lines, 20 on a page.

Begins on fol. 26*b* of the MS. described under No. 5574, wherein it is included in Vanadurgāmahāvidyā 25*a* given therein in the list of other works.

Complete.

Same as the above.

No 7182. वनदुर्गामहाविद्यामालामन्त्रः.

VANADURGĀMAHĀVIDYĀMĀLĀMANTRAḤ.

Pages, 32. Lines, 8 on a page.

Begins on fol. 103*a* of the MS. described under No. 124, wherein it is found in Mahāvidyāvanadurgā 102*a* given therein in the list of other works.

Complete.
Similar to the above.

Beginning:

ओं ह्रीं दुं ओं नमो भगवति चिन्तामणि दुर्गे उत्तिष्ठ पुरुषि महाविद्यावनदुर्गारूपिणि शूलिनि दुर्गे किं स्वपिषि चण्डिके मधुकैटभ-संहारिणि ।

End:

वर्षन्त—द्विषो जहि ओं उत्तिष्ठ पुरुषि ह्र, किं स्वपिषि शिरसे, भयं मे समुपस्थितं शिखायाः . . . . . .

वनदुर्गाध्यानम्—

सौवर्णाम्बुजमध्यगां त्रिणयनां सौदामिनीसन्निभां
शङ्खं चक्रगदाभयानि दधतीमिन्दोः कलां बिभ्रतीम् ।
ग्रैवेयाङ्गदहारकुण्डलधरामाखण्डलाद्यैस्स्तुतां
ध्यायेऽहं ध्वनि(चिति)वासिनीं शशिमुखीं पार्श्वस्थवश्येऽन(न्व)हम् ॥

No. 7183. वनदुर्गामहाविद्यामालामन्त्रः.

VANADURGĀMAHĀVIDYĀMĀLĀMANTRAḤ.

Pages, 58. Lines, 7 on a page.

Begins on fol. 13*a* of the MS. described under No. 7156.
Complete.
Same as the above.

No. 7184. वनदुर्गामहाविद्यामालामन्त्रः.

VANADURGĀMAHĀVIDYĀMĀLĀMANTRAḤ.

Pages, 7. Lines, 19 on a page.

Begins on fol. 45*b* of the MS. described under No. 2886.
Complete.
Similar to the above.

Beginning:

मालामन्त्रः—

ह्रीं दुं ओं नमो भगवति चिन्तामणि महादुर्गे उत्तिष्ठ पुरुषि महाविद्यावनदुर्गारूपिणि शूलिनि दुर्गे किं स्वपिषि चण्डिके मधुकैटभ-संहारिणि ।

End:

प्रतिकूलं मे नश्यतु, अनुकूलं मे ऽस्तु । महादेव्यै च विद्महे विष्णुपत्न्यै च धीमहि । तन्नो लक्ष्मीः प्रचोदयात् । ओं ब्लूं ह्रीं श्रीं ब्रह्मकोशेन मां रक्ष रक्ष हुं फट् स्वाहा ।

अव ब्रह्म द्विषो जहि . . . . . हेमप्रख्यामित्यादि-ध्यानं, मूलमन्त्रजपं कृत्वा मालामन्त्रं दशवारं जपेत् ॥

No. 7185. वनदुर्गामालामन्त्रः.
VANADURGĀMĀLĀMANTRAḤ.

Pages, 2. Lines, 20 on a page.

Begins on fol. 41*b* of the MS. described under No. 5574.

Complete.

This Mantra is in praise of Vanadurgā; and its repetition is considered to have the power to counteract the evils caused by minor spirits. It differs from Vanadurgāmahāvidyāmālāmantra in that it does not contain the accessory Mantras.

Beginning:

ओं ह्रीं दुर्गामालामन्त्रः—

ओं नमो भगवति चिन्तामणि महादुर्गि उत्तिष्ठ पुरुषि महाविद्यावनदुर्गारूपिणि शूलिनि दुर्गि किं स्वपिषि चण्डिके मधुकैटभसंहारिणि ।

End:

क्षुद्रोपद्रवं छिन्धि छिन्धि भिन्धि भिन्धि खें खें खें खें हुं हुं हुं फट् फट् फट् स्वाहा ॥

No. 7186. वनदुर्गामालामन्त्रः.

VANADURGĀMĀLĀMANTRAḤ.

Pages, 3. Lines, 6 on a page.

Begins on fol. 29*a* of the MS. described under No. 2424, wherein it is found in the Vanadurgāmantra 28*a* which is given in the list of other works.

Complete.

Similar to the above.

Beginning:

मालामन्त्रः—

ओं नमः कृष्णवाससि सहस्रकोटिसिंहासने सहस्रपादसहस्रभुजसहस्रवदने सहस्रत्रिणेत्रोज्ज्वले ।

End:

कालरात्रि प्रत्यङ्गिरे दुर्गे मां रक्ष रक्ष सर्वशत्रून् भक्ष भक्ष हुं फट् स्वाहा । यन्त्रम्—

त्रिरेखा च त्रिशूलं च मध्ये शूलचतुष्टयम् ।
प्रणवेन वेष्टते युक्तं मूलमन्त्रं समालिखेत् ॥
दुरितं(?) दुष्टसंहारं दुर्गामन्त्रं समालिखेत् ।

No. 7187. वराहचतुर्दशाक्षरमन्त्रः.

VARĀHACATURDAŚĀKṢARAMANTRAḤ.

Page, 1. Lines, 8 on a page.

Beigns on fol. 9*a* of the MS. described under No. 5786.

Complete.

The repetition of this Mantra, consisting of 14 syllables, is intended to secure the favour of Viṣṇu in his incarnation as Varāha.

Beginning:

पूर्णज्ञानेत्यादिषडङ्गन्यासः ।

ओं नमो भगवते महावराहाय स्वाहा इति प्राणायामः १२.

* * * *

अस्य श्रीचतुर्दशाक्षरवराहमन्त्रस्य ब्रह्मा ऋषिः, शक्करी छन्दः, श्रीवराहो देवता ; श्रीवराहप्रेरणया वराहप्रीत्यर्थे जपे विनियोगः।

End:

चतुर्दशाक्षरवराहमन्त्रजपङ्करिष्ये।

ओं नमो भगवते महावराहाय स्वाहा—इति जपः। उपसंहारः पूर्ववत्॥

No. **7188.** वराहत्रयस्त्रिंशदक्षरमन्त्रः.

VARĀHATRAYASTRIṂŚADAKṢARAMANTRAḤ.

Pages, 2. Lines, 8 on a page.

Begins on fol. 8*a* of the MS. described under No. 5786.

Complete.

Similar to the above.

This Mantra consists of 33 syllables. Its repetition is believed to be efficacious in bestowing sovereignty on one.

Beginning:

ओं हुं नमो भगवते वराहरूपाय भूर्भुवस्स्वःपतये भूपतित्वं मे देहि दापय स्वाहा। इति प्राणायामः १२.

* * * *

अस्य श्रीत्रयस्त्रिंशदक्षरवराहमन्त्रस्य ब्रह्मा ऋषिः, अनुष्टुप् छन्दः, श्रीवराहो देवता ; श्रीवराहप्रेरणया श्रीवराहप्रीत्यर्थे जपे विनियोगः।

End:

ओं हुं नमो भगवते वराहरूपाय भूर्भुवस्स्वः पतये भूपतित्वं मे देहि दापय स्वाहा—इति जपः। उपसंहारः पूर्ववत्॥

No. **7189.** वराहमालामन्त्रः.

VARĀHAMĀLĀMANTRAḤ.

Pages, 3. Lines, 4 on a page.

Begins on fol. 170*a* of the MS. described under No. 2848, wherein this Mantra has been omitted to be included in the list of other works given therein.

Complete.

The repetition of this Mantra is believed to have the power to enable one to acquire wealth.

Beginning:

(अथ श्रीवरा)हमन्त्रविधानमुच्यते—भार्गव ऋषिः, अनुष्टुप् छन्दः, श्रीवराहो देवता; हुं बीजं, स्वाहा शक्तिः, श्रीं कीलकं, वराहप्रसाद-सिद्ध्यर्थे जपे विनियोगः ।

End:

ओं नमो भगवते वराहरूपाय . . . . द्रव्यं मे देहि

दापय स्वाहा—इति मन्त्रः। लक्षं जपः ।

त्रिमधुरासि(ते)क्षुपद्मैर्दशांशहोमः ॥

No. 7190. वराहसप्ताक्षरमन्त्रः.

VARĀHASAPTĀKṢARAMANTRAḤ.

Page, 1. Lines, 8 on a page.

Begins on fol. 8*b* of the MS. described under No. 5786.

Complete.

This Mantra consists of seven syllables. It is also addressed to Viṣṇu in his incarnation as Varāha.

Beginning:

ओं हुं वराहाय नमः ओं (इति प्रणायामः) १२.

* * * *

अस्य सप्ताक्षरवराहमन्त्रस्य ब्रह्मा ऋषिः, उष्णिक छन्दः, श्रीवराहो देवता; श्रीवराहप्रेरणया श्रीवराहमन्त्रजपे विनियोगः ।

End:

सप्ताक्षरवराहमन्त्रजपङ्करिष्ये—

ओं हुं वराहाय नमः ओं—इति जपः । उपसंहारः पूर्ववत् ॥

वराहमन्त्रस्य षडङ्गन्यासः॥

No. 7191. वर्णमालिका.

VARṆAMĀLIKĀ

Pages, 3. Lines, 6 on a page.

Begins on fol. 21*a* of the MS. described under No. 217.

Complete.

Herein the series of letters making up the alphabet is looked upon as a Mantra. These letters are taken singly or collectively and repeated along with other Mantras.

Beginning:

अस्य श्रीवर्णमालिकामहामन्त्रस्य शब्दब्रह्म ऋषिः, नाना छन्दांसि, अकारादि त्रिरेखान्तरी सुषुम्ना कुण्डलिनी सरस्वती देवता ; चतुस्त्रिंशद्वर्णा बीजं, पञ्च स्वराश्शक्तयः, स्वरवर्णमयं कीलकं, मम श्रीवर्णमालिकाप्रसादसिद्ध्यर्थे जपे विनियोगः ।

End:

क्षः हः सः षः शः वः लः रः यः मः भः बः फः पः नः धः दः थः तः णः ढः डः ठः टः ञः झः जः छः चः ङः घः गः खः कः अः अं औः ओः ऐः एः ऊः उः ईः इः आः अः इति एकैकवर्णानुच्चार्य मन्त्रं जप्त्वा वर्गक्रमेण जप्त्वा एवमष्टोत्तरशतं जप्त्वा तत उद्वसेत् ॥

No. 7192. वशीकरणवाराहीमन्त्रः.

VAŚĪKARAṆAVĀRĀHĪMANTRAḤ

Pages, 4. Lines, 6 on a page.

Begins on fol. 35*a* of the MS. described under No. 3862.

Complete.

The repetition of this Mantra, which is addressed to Vārāhī i.e., Viṣṇu's Śakti conceived as a goddess, is believed to have the power to enable one to bring people under one's control and influence.

Beginning:

अस्य श्रीवशीकरणवाराहीमहामन्त्रस्य अज ऋषिः, गायत्री छन्दः, वशीकरणवाराही देवता ; क्रों बीजं, ऐं शक्तिः, क्लीं कीलकं, मम वशीकरणवाराहीप्रसादसिद्ध्यर्थे जपे विनियोगः ।

ओं ब्लूं ऐं ग्लौं नमो भगवति वाराहि सर्वजनं मे वशमानय वौषट् ठ ठ ठ ठ हुं फट् स्वाहा ॥

End :

वशीकरणबाणस्त्वं भक्तानामनिवारितः ।
तस्मादवश्यं वाराहि जगत्सर्वं वशं कुरु ॥
वश्यस्तोत्रमिदं देव्यास्त्रिसन्ध्यं यः पठेन्नरः ।
सोऽपि वश्यं नयेत्सर्वं कामं राजानमेव च ॥

No. 7193. वश्यवाराहीमन्त्रः.

VAŚYAVĀRĀHĪMANTRAḤ.

Page, 1. Lines, 8 on a page.

Begins on fol. 198*b* of the MS. described under No. 119, wherein it is given as Vārāhīstōtra.

Complete.

Similar to the above.

Beginning :

मुखरञ्जनि क्लीं ह्रीं श्रीं सर्वराजवशङ्करि सर्वदुष्टमृगवशङ्करि सर्वलोकवशङ्करि अमुकं वशमानय स्वाहा ।

End :

तद्बाह्येऽष्टदलं प्रो . . . पत्रे मनःप्रिये ।
चतुरश्रन्तु तद्बाह्ये देवि देव्यासनं भवेत् ॥

No. 7194. वश्यवाराहीमन्त्रः.

VAŚYAVĀRĀHĪMANTRAḤ.

Pages, 2. Lines, 5 on a page.

Begins on fol. 2*a* of the MS. described under No. 5686 wherein it is given as Vaśyavārāhīstōtra.

Complete.

Similar to the above.

Beginning :

अस्य श्रीवशीकरणी(ण) वाराहीस्तोत्रमन्त्रस्य अज ऋषिः, गायत्री छन्दः, वशीकरणी वाराही देवता ; व्रां बीजं, व्रीं शक्तिः, व्रूं कीलकं, मम श्रीवशीकरणवाराहीप्रसादसिद्ध्यर्थे जपे विनियोग ।

End :

मूलम्—

वाराहि सर्वजनं मे वशमान[ा]य वौषट् ठं ठं ठं ठं ओं फट् स्वाहा ॥

No. 7195. वागीश्वरीमन्त्रः.

VĀGĪŚVARĪMANTRAḤ.

Pages, 2. Lines, 27 on a page.

Begins on fol. 229*a* of the MS. described under No. 581, wherein it is included in the Mantramālikā 229*a*.

Complete.

The Mantra is addressed to Vāgīśvarī, who is the same as Sarasvatī ; and its repetition is considered to have the power to enable one to become a learned poet.

Beginning :

अस्य श्रीवागीश्वरीमन्त्रस्य कण्व ऋषिः, विराट् छन्दः, श्रीवागीश्वरी देवता ; वं बीजं, स्वाहा शक्तिः, मम वाक्सिद्ध्यर्थे जपे विनियोगः ।

End :

मन्त्रः—

ओं ऐं वद वद वाग्वादिनि स्वाहा ॥ एवं ध्यात्वा षोडशोपचारं कुर्यात् ।

* * * *

वत्सरात्कवित्वं वाक्सिद्धिश्च भवति ॥

No. 7196. वागीश्वरीमन्त्रः.
VĀGĪŚVARĪMANTRAḤ.

Page, 1. Lines, 10 on a page.

Begins on fol. 86*a* of the MS. described under No. 5566.

Complete.

Same as the above.

No. 7197. वागीश्वरीमन्त्रः.
VĀGĪŚVARĪMANTRAḤ.

Page, 1. Lines, 18 on a page.

Begins on fol. 273*a* of the MS. described under No. 5477, wherein it is included in the Mantramālikā 273*a* given therein in the list of other works.

Complete.

Same as the above ; but no mention is made of the Ṛṣi (sage), Chandas (metre), and Dēvatā (the presiding deity).

No. 7198. वागीश्वरीमन्त्रः.
VĀGĪŚVARĪMANTRAḤ.

Pages, 2. Lines, 18 on a page.

Begins on fol. 22*a* of the MS. described under No. 5673, wherein it is included in the Āmnāyamantramālikā 1*a* given therein in the list of other works.

Complete.

Similar to the above.

Beginning :

अस्य श्रीवागीश्वरीमहामन्त्रस्य दक्षिणामूर्तिः ऋषिः, गायत्री छन्दः, श्रीवागीश्वरी देवता ; ऐं बीजं, ह्रीं शक्तिः, सौः कीलकं, मम श्रीवागीश्वरीप्रसादसिद्ध्यर्थे विनियोगः।

End :

मनुः——
ऐं ह्रीं सौः वद वद वाग्वादिनि स्वाहा।
वागीश्वरीश्री।

आरोधनकरी माया त्रिगुणा जगदात्मिके (का) ।
तमस्स्वरूपिणी ध्येयानो(चो)त्तराम्नायदेवता ॥

* * * *

इत्युत्तरात्रायदेवताश्चानाहते मनश्चक्रे च पूजयेत् ॥

No. 7199. वाग्वादिनीमन्त्रः.

VĀGVĀDINĪMANTRAḤ.

Page, 1. Lines, 10 on a page.

Begins on fol. 232*b* of the MS. described under No. 124, wherein it is found in the Ṣaḍāmnāyamantra 228*b*.

Complete.

Similar to the above.

Beginning :

अस्य श्रीवाग्वादिनीमन्त्रस्य दक्षिणामूर्तिः ऋषिः, गायत्री छन्दः, वाग्वादिनी देवता; ऐं बीजं, ह्रीं शक्तिः, सौः कीलकं, वाग्वादिनी-प्र—गः ।

End :

ऐं ह्रीं सौः वद वद वाग्वादिनि स्वाहा । वाग्वादिनीदिव्यश्री-मः, ऐं ह्रीं श्रीं रूफ्रें महाचण्डयोगीश्वरी—उत्तराम्नायसमयविद्येश्वरी—कालसङ्कर्षण्यम्बादिव्य—मः ॥

No. 7200. वाग्वादिनीमन्त्रः.

VĀGVĀDINĪMANTRAḤ.

Page, 1. Lines, 6 on a page.

Begins on fol. 8*b* of the MS. described under No. 673, wherein it is found in the Ṣaḍāmnāya 1*a*.

Complete.

Similar to the above.

Beginning:

अस्य श्रीवाग्वादिनीमन्त्रस्य दक्षिणामूर्तिः ऋषिः, गायत्री छन्दः, वाग्वादिनी देवता; ऐं बीजं, ह्रीं शक्तिः, सौः कीलकं, मम वाग्वादिनीप्रसादसिद्ध्यर्थे जपे विनियोगः ।

End:

ऐं ह्रीं श्रीं सौः वद वद वाग्वादिनि स्वाहा । वाग्वादिन्यम्बाश्रीपा—नमः । . . . . .

द्विसहस्रदेवतापरिवारिताय ओड्याणपीठाय नमः । ओड्याणपीठश्री—नमः ॥

Colophon:

इत्युत्तराम्नायः ॥

No. 7201. वाग्वादिनीमन्त्रः.

VĀGVĀDINĪMANTRAḤ.

Page, 1. Lines, 11 on a page.

Begins on fol. 1*a* of the MS. described under No. 5683.

Complete.

Similar to the above.

Beginning:

अथ वागीश्वरीमन्त्रविधानमुच्यते—

(अस्य श्रीवाग्वादिनीमन्त्रस्य) कण्व ऋषिः, विराट् छन्दः, वागीश्वरी देवता; ऐं बीजं, स्वाहा शक्तिः, मातृकावदङ्गानि ।

End:

विद्याप्रधानोऽयं मन्त्रः, अक्षरलक्षं जपेत् पुरश्चरणार्थम्; सितैः कमलैः पयस्सिक्तैः . . . . . पुरश्चरणहोमः ॥

No. 7202. वाग्वादिनीमालामन्त्रः.

VĀGVĀDINĪMĀLĀMANTRAḤ.

Page, 1. Lines, 5 on a page.

Begins on fol. 62*a* of the MS. described under No. 5885.

Complete.

This Mantra is in praise of the goddess Vāgvādinī under various significant names.

Beginning :

हं साध्यबन्धनाय, ह्रीं सर्वभूतिप्रदाय, ऐं वाक्प्रदाय, क्लीं सर्वजगद्वशीकरणाय, सौः सर्वसंक्षोभणाय, श्रीं महासंपत्प्रदाय, ग्लौं भूमण्डलाधिपत्यप्रदाय, द्रां चोरजीविने, ब्लूं संमोहनाय, ओं मोक्षप्रदाय ।

End :

ऐं क्लीं सौः वद वद वाग्वादिनि स्वाहा । सौः क्लीं ऐं ओं खें खें मारय मारय ह्रीं ह्रीं मम सकलाभिवृद्धये मनस्संपन्नय स्वाहा ॥

No. **7203.** वामनमन्त्रः.

VĀMANAMANTRAḤ.

Page, 1. Lines, 8 on a page.

Begins on fol. 11*b* of the MS. described under No. 5786.

Complete.

The repetition of this Mantra is believed to have the power to secure the favour of Vāmana, an incarnation of Viṣṇu

Beginning :

ओं वां वामनाय नमः इति प्राणायामः १२. . . . .

अस्य श्रीवामनमन्त्रस्य ब्रह्मा ऋषिः, गायत्री छन्दः, वामनो देवता; वामनप्रेरणया वामनप्रीत्यर्थे जपे विनियोगः ।

End :

वामनमहामन्त्रजपङ्करिष्ये ।

ओं वां वामनाय नमः ओं इति जपः । उपसंहारः पूर्ववत् ॥

No. 7204. वामनमन्त्रः.
VĀMANAMANTRAḤ.

Page, 1. Lines, 19 on a page.

Begins on fol. 325*a* of the MS. described under No. 5477, wherein it is included in the Mantramālikā, (Ākāśabhairavakalpa) 273*a* given therein in the list of other works.

Complete.

Similar to the above.

Vāmana is herein looked upon as the giver of food.

Beginning:

अस्य श्रीवामनमन्त्रस्य ब्रह्मा ऋषिः, गायत्री छन्दः, (श्रीवामनो देवता,) श्रीवामनप्रसादसिद्ध्यर्थे जपे विनियोगः ।

End:

ओन्नमो भगवते विष्णवे अन्नाधिपतये स्वाहा—इति मन्त्रः दशसहस्रं जपः । इति ।

No. 7205. वायव्यास्त्रमन्त्रः.
VĀYAVYĀSTRAMANTRAḤ.

Page, 1. Lines, 19 on a page.

Begins on fol. 27*a* of the MS. described under No. 2886.

Complete.

It is stated herein that the repetition of this Mantra is a necessary preliminary to the use of the Brahmāstra.

Beginning:

आ वायव्यया वायव्या और्वाय या वा—इति वायव्यास्त्रेण नववारं प्राणानायम्य ब्रह्मास्त्रप्रयोगार्थं वायव्यास्त्रमन्त्रजपं करिष्ये—

अस्य श्रीवायव्यास्त्रप्रयोगमन्त्रस्य ब्रह्मा ऋषिः, गायत्री छन्दः। महाभूतवायुर्देवता; यां बीजं, स्वाहा शक्तिः, जगत्सृष्टिरिति कीलकं,, ब्रह्मास्त्रप्रयोगार्थं वायव्यास्त्रप्रयोगे विनियोगः ।

End:

पञ्चोपचारैरभ्यर्च्य वायव्यास्त्रं त्रिवारं जपेत् ॥

No. 7206. वाराहीकवचः.
VĀRĀHĪKAVACAḤ.

Pages, 3. Lines, 5 on a page.

Begins on fol. 46*b* of the MS. described under No. 5661, wherein it has been omitted to be included in the list of the other works contained therin.

Complete.

The repetition of this Kavacamantra, which is addressed to the goddess Vārāhī, is believed to have the power to secure protection to one from all dangers and to enable one to destroy one's enemies.

Beginning:

अस्य श्रीवाराहीकवचस्य त्रिलोचन ऋषिः, अनुष्टुप् छन्दः, श्रीवाराही देवता; ओं बीजं, ग्लौं शक्तिः, स्वाहा इति कीलकं, मम सर्वशत्रुनाशनार्थे जपे विनियोगः । . . . . . .

वार्ताली मे शिरः पातु वाराही फालमुत्तमम् ।
नेत्रे वराहवदना पातु कर्णौ तथान्धिनी ॥

End:

वाराहीकवचं नित्यं त्रिसन्ध्यं यः पठेन्नरः ॥
तथाविधं भूतगणा न स्पृशन्ति कदा चन ।
आपदश्शत्रुचोरादिग्रहदोषाश्च(शु) सम्भवाः ॥
माता पुत्रं यथा वत्सं धेनुः पक्ष्मेव लोचनम् ।
तथाङ्गमेव वाराही रक्ष रक्षेति सर्वदा ॥

Colophon:

इति वाराहीकवचं संपूर्णम् ॥

No. 7207. वाराहीमन्त्र .
VĀRĀHĪMANTRAḤ.

Pages, 3. Lines, 18 on a page.

Begins on fol. 16*b* of the MS. described under No. 5673, wherein it is included in the Āmnāyamantramālikā 1*a*.

Complete.

The proper repetition of this Mantra, which is addressed to the goddess Vārāhī, is believed to be efficacious in bringing people under one's influence and control.

Beginning:

अस्य श्रीवाराहीमहामन्त्रस्य धरणीवराह ऋषिः, गायत्री छन्दः, श्रीवाराही देवता; ग्लौं बीजं, ऐं शक्तिः, सौः कीलकं, मम श्रीवाराही-प्रसादसिद्ध्यर्थे जपे विनियोगः ।

End:

मनुः—

ऐं ग्लौं ओं नमो भगवति वार्तालि वाराहि वाराहि वराहमुखि वराहमुखि . . . . . शीघ्रं वश्यं कुरु कुरु ऐं ग्लौं ठ ठ ठ ठ हुं फट् स्वाहा । श्रीवाराह्यम्बाश्रीपादुकाम् ॥

No. **7208.** वाराहीमन्त्रः.

VĀRĀHĪMANTRAḤ.

Page, 1. Lines, 4 on a page.

Begins on fol. 244*a* of the MS. described under No. 537.

Complete.

Similar to the above.

Beginning:

अस्य श्रीवाराहीमहामन्त्रस्य धरावराह ऋषिः, गायत्री छन्दः, वाराही देवता; ग्लौं बीजं, ऐं शक्तिः, सौः कीलकं, मम वाराहीसिद्ध्यर्थे विनियोगः ।

End:

शीघ्रं वश्यं कुरु कुरु ऐं ग्लौं ठ ठ ठ ठ हुं फट् स्वाहा।

दिग्बन्धः । मूलम्—

दंष्ट्रोल्लसत्पोत्रिमुखारविन्दकोटीरसंभिन्नहिमांशुरेखाम् ।
हलं कपालं मुसलं दधानामात्रासिनीं दुर्घटकाननस्थाम् ॥

ऐं ग्लौं सौः ॥

No. 7209. वाराहीमन्त्रः.
VĀRĀHĪMANTRAḤ.

Page, 1. Lines, 5 on a page.

Begins on fol. 135*a* of the MS. described under No. 537.

Complete.

This Mantra is addressed to the holy sandals of the goddess Vārāhī.

Beginning:

अस्य श्रीवाराहीमन्त्रस्य ब्रह्मा ऋषिः, गायत्री छन्दः, वाराहीगुरुपादुका देवता; ऐं गामिति बीजं, ह स शक्तिः, स ह कीलकम् ।

End:

श्रीगुर्वङ्घ्रिलसद्भूषां कपालासिधरां शिवाम् ।
नीलमेघप्रभां वन्दे वाराहीगुरुपादुकाम् ॥

ऐं ग्लौं ह्रस्फ्रं । शेषं पूर्ववत् ॥

No. 7210. वारुणमन्त्रः.
VĀRUṆAMANTRAḤ.

Pages, 2. Lines, 6 on a page.

Begins on fol. 59*a* of the MS. described under No. 5987.

Complete.

The repetition of this Mantra addressed to Varuṇa is believed to bring about a downpour of rain.

Beginning:

अस्य श्रीवारुणमहामन्त्रस्य विभाण्डकपुत्र ऋश्यशृङ्ग ऋषिः, देवी गायत्री छन्दः, पर्जन्यो देवता; वं बीजं, वारुणी शक्तिः, अस्मिन् देशे सद्यस्सुवृष्टिं कुरु कुरु स्वाहेति कीलकं, अस्मिन् देशे अवग्रहदोषनिवृत्त्यर्थे अतिवृष्टिसिद्ध्यर्थे जपे विनियोगः ।

End:

समुद्रमध्यनिलयं वारुणीपतिमव्ययम् ।
प्रभुं सुवृष्टिदातारं वन्देऽहं वरुणं सदा ॥

मनुः—
ओं(वं) अस्मिन् देशे सद्यस्सुवृष्टिं कुरु कुरु स्वाहा ॥

No. 7211. वासुदेवद्वादशाक्षरमन्त्रः.
VĀSUDĒVADVĀDAŚĀKṢARAMANTRAḤ.

Page, 1. Lines, 8 on a page.

Begins on fol. 6*a* of the MS. described under No. 5786.

This Mantra consists of 12 syllables. Its repetition is believed to please Viṣṇu as Vāsudēva.

Beginning:

अथ वासुदेवद्वादशाक्षरमन्त्रः—ओं नमो भगवते वासुदेवायेति प्राणायामः १२.

ओं केशवाय नमः शिरसि, ओं नारायणाय नमः नेत्रयोः,

* * * *

अस्य श्रीवासुदेवद्वादशाक्षरमन्त्रस्य अन्तर्यामी ऋषिः, जगती छन्दः, श्रीवासुदेवो देवता; श्रीवासुदेवप्रेरणया श्रीवासुदेवप्रीत्यर्थे श्रीवासुदेवद्वादशाक्षरमन्त्रजपे विनियोगः ।

End:

वासुदेवद्वादशाक्षरमन्त्रजपं करिष्ये—
ओं नमो भगवते वासुदेवाय ओं—इति जपः । उपसंहारः पूर्ववत् ॥

No. 7212. विकलयाक्षिणीमन्त्रः.
VIKALAYAKṢIṆĪMANTRAḤ.

Page, 1. Lines, 27 on a page.

Begins on fol. 251*a* of the MS. described under No. 581, wherein it is found in the Mantramālikā 229*a*.

Complete.

This Mantra is addressed to an aged Yakṣiṇī; and its repetition is believed to be conducive to one's prosperity and well-being.

Beginning and **End**:

मन्त्रः—विकले ऐं ह्रीं श्रीं क्लीं स्वाहा।

ग्रहेण मासत्रयं जपं कुर्यात्। पूर्वोक्तदशांशहोमः। अष्टैश्वर्यप्रदो भवति ॥

No. **7213.** विकलयक्षिणीमन्त्रः.

VIKALAYAKṢIṆĪMANTRAḤ.

Page, 1. Lines, 18 on a page.

Begins on fol. 297*a* of the MS. described under No. 5177 wherein it is found in the Mantramālikā 273*a*.

Complete.

Same as the above.

No. **7214.** विकलयक्षिणीमन्त्रः.

VIKALAYAKṢIṆĪMANTRAḤ.

Page, 1. Lines, 10 on a page.

Begins on fol. 99*a* of the MS. described under No. 5566, wherein it has been omitted to be included in the list of other works.

Complete.

Same as the above.

No. **7215.** विघ्नेश्वरकवचः.

VIGHNĒŚVARAKAVACAḤ.

Pages, 6. Lines, 19 on a page.

Begins on fol. 68*a* of the MS. described under No. 426, wherein it is given as Gaṇēśakavaca.

Complete as found in the Bhaviṣyōttara Purāṇa.

This Kavaca-mantra is addressed to the god Vināyaka ; and its repetition is believed to have the power to secure protection to one from dangers and to remove one's diseases.

Beginning:

नन्दिकेश्वर सर्वज्ञ भक्तानुग्रहकारक।
भक्तिमुक्तिप्रदं नृणां सर्वरक्षाकरं परम् ॥

* * * *

कवचं श्रोतुमिच्छामि सर्वकामार्थसाधनम् ।

* * * *

श्रीनन्दिकेश्वर उवाच—

शृणु ब्रह्मन् प्रवक्ष्यामि गुह्याद्गुह्यतमं महत् ।
विघ्नेशकवचं पुण्यं पवित्रं पापनाशनम् ॥

* * * *

अस्य श्रीमहागणेशकवचमहामन्त्रस्य आदिपुरुषोत्तमऋषये नमः, अनुष्टुप्छन्दसे नमः, श्रीगणेश्वरदेवतायै नमः, गं बीजाय नमः, ह्रीं शक्तये नमः, श्रीं कीलकाय नमः, श्रीमहागणपतिप्रसादसिद्ध्यर्थे जपे विनियोगः ।

* * * *

विघ्नेशः पार्श्वतः पातु गणाध्यक्षस्तु दक्षिणे ।
पश्चिमे गजवक्त्रस्तु उत्तरे त्वघनाशनः ॥

End:

जलस्थलगतो वापि पातु मायापहारकः ।
सर्वत्र पातु सर्वेशः सर्वलोकेषु संश्रयः ॥

अभेद्यकवचं गुह्यं पवित्रं पापनाशनम् ।
प्रातः काले जपेन्नित्यं सदा व्याधिनिवारणम् ॥

* * * *

यं ब्रह्मचारिणमचिन्त्यमनेकरूपं ध्यायेज्जगद्धितमशेषदमापदघ्नम् ।
यस्सर्वसिद्धिभ(म)जतां ददतां वरिष्ठं विघ्नेश्वर सकलसिद्धिकरश्च नृणाम्॥

Colophon:

इति भविष्योत्तरपुराणे चतुर्थखण्डे . . . . . विघ्नेश्वर-कवचं सम्पूर्णम् ॥

No. 7216. विघ्नेश्वरकवचः.

VIGHNEŚVARAKAVACAḤ.

Pages, 11. Lines, 5 on a page.

Begins on fol. 18*a* of the MS. described under No. 1872, wherein it is given as Gaṇapatikavaca.

Complete.

Similar to the above.

Beginning:

ब्रह्मोवाच---

नन्दिकेश्वर सर्वज्ञ भक्तानुग्रहकारक ।
भुक्तिमुक्तिप्रदं नृणां सर्वरक्षाकरं परम् ॥

* * * *

अस्य श्रीविघ्नेशकवचमहामन्त्रस्य आदिपुरुषोत्तम ऋषिः, त्रिष्टुबनुष्टुप् छन्दांसि, श्रीविनायको देवता, गं बीजं, गिं शक्तिः, इदं कीलकं, रक्तवर्णश्रीमहागणपतिप्रीत्यर्थे जपे विनियोगः ।

* * * *

विघ्नेशः पूर्वतः पातु गणाध्यक्षस्तु दक्षिणे ।
पश्चिमे गजवक्त्रस्तु उत्तरे विघ्ननाशनः ॥

End:

स्वस्तये सकलकार्यसिद्धये वस्तु हस्तिमुखमस्तु मे सदा ॥

* * * *

Colophon:

इति गणपतिकवचं सम्पूर्णम् ॥

No. 7217. विघ्नेश्वरकवचः.

VIGHNĒŚVARAKAVACAḤ.

Pages, 22. Lines, 4 on a page.

Begins on fol. 1*a* of the MS. described under No. 5953.

Complete, as found in the Brahmāṇḍapurāṇa.

Similar to the above. Held to be efficacious in removing all kinds of sins.

Beginning:

गजाननं भूतगणाधिसेवितं कपित्थजम्बूफलसारभक्षकम् ।
उमासुतं शोकविनाशकारणं नमामि विघ्नेश्वरपादपङ्कजम् ॥

ओं ब्रह्मोवाच—

नन्दिकेश्वर सर्वज्ञ भक्तानुग्रहकारकम् ।
कवचं श्रोतुमिच्छामि सर्वकाम्यार्थसाधनम् ॥

* * * *

अस्य श्रीविघ्नेश्वरकवचस्तोत्रमहामन्त्रस्य आदिपुरुषोत्तम ऋषिः, अनुष्टुप् छन्दः, श्रीविघ्नेश्वरो देवता, विं बीजं, घ्नं शक्तिः, शं कीलकं, मम समस्तपापक्षयार्थे जपे विनियोगः ।

End:

सर्वां च सिद्धिं लभते मनुष्यो विघ्नेशसायुज्यमुपैति संशयः ॥
विघ्नेशसायुज्यमुपैति संशयो नमः ॥

Colophon:

इति ब्रह्माण्डपुराणे ब्रह्मनन्दिकेश्वरसंवादे विघ्नेश्वरकवचं सम्पूर्णम् ॥

No. 7218. विघ्नेश्वरमालामन्त्रः.

VIGHNĒSVARAMĀLĀMANTRAḤ.

Page, 1. Lines, 9 on a page.

Begins on fol. 84*a* of the MS. described under No. 21.

Complete.

This Mantra is in praise of Vināyaka under different significant names; and its repetition is held to be efficacious in enabling one to accomplish one's desires.

Beginning and **End:**

ओं यं ब्रह्मेशसुमुखाय लम्बोदराय अभीष्टमहात्मने सर्वकार्यसिद्धिकराय ओं क्रौं भ्यां घां आं ह्रीं क्रों अभीष्टाय स्वाहा। ओं एकदन्ताय लम्बोदराय अभीष्टमहात्मने सर्वकार्यसिद्धिकराय ह्रीं ह्रीं गजाननाय गणपतये स्वाहा ॥

No. 7219. विदारणनृसिंहमन्त्रः.

VIDĀRAṆANṚSIṂHAMANTRAḤ.

Page, 1. Lines, 19 on a page.

Begins on fol. 24*a* of the MS. described under No. 2886.

Complete.

This Mantra is addressed to Nṛsiṁha conceived as tearing the demon Hiraṇyakaśipu; and its repetition is believed to have the power to enable one to accomplish one's desires.

Beginning:

अस्य श्रीविदारणनृसिंहस्य नारदो भगवानृषिः, अनुष्टुप् छन्दः, श्रीविदारणनृसिंहो देवता; आं बीजं, लं शक्तिः, गं कीलकं, मम सर्वाभीष्टार्थे विनियोगः ।

End:

श्रीं ह्रीं ओं ओं श्रीं ह्रीं उग्रं वीरमीयते शुचिः । नृसिंहं भीषणं भद्रं मृत्युमृत्युं नमाम्यहं श्रीं ह्रीं ओं श्रीनृसिंहाय विद्महे वज्रनखाय धीमहि । तन्नः(नृ)सिंहः प्रचोदयात् ॥

No. 7220. विद्यागोपालमन्त्रः.

VIDYĀGŌPĀLAMANTRAḤ

Pages, 2. Lines, 5 on a page.

Begins on fol. 57*a* of the MS. described under No. 5885.

Complete.

This Mantra consists in the repetition of a combination of the Kṛṣṇa-mantra with the Śrīvidyā-mantra. Both these Mantras are divided into 3 parts, and the first part of the Śrīvidyā mantra is repeated after the first part of the Kṛṣṇa-mantra, the second after the second, and so on the combination is made as shown below:—

क्लीं कृष्णाय क ए ई ल ह्रीं, गोविन्दाय ह स क ह ल ह्रीं, गोपीजनवल्लभाय स्वाहा स क ल ह्रीं ।

Beginning:

अस्य श्रीविद्यागोपालमन्त्रस्य आनन्दभैरव नारदा ऋषयः, अनुष्टुप् छन्दः, गायत्री छन्दः, श्रीविद्यागोपालो देवता; क्लीं बीजं, स्वाहा शक्तिः, कृष्णाय कीलकं, श्रीविद्यागोपालप्रीत्यर्थे जपे विनियोगः ।

End:

आद्यपादमध्यमं मध्यमे द्वे चान्ते चान्तं योजयित्वा क्रमेण विद्यामन्त्रं कृष्णमन्त्रेण मन्त्रयेत् ॥

No. 7221. विद्यासम्पुटितमातृकान्यासः.

VIDYĀSAMPUṬITAMĀTṚKĀNYĀSAḤ.

Pages, 2. Lines, 9 on a page.

Begins on fol. 193*b* of the MS described under No. 124, wherein it is found in Daśavidhamātṛkānyāsa 192*a* in the list of other works.

Complete.

On the ceremonial touching of certain parts of the body, while repeating at the same time the series of the Mantra-formulas containing the successive letters of the alphabet introduced into the Śrīvidyā-mantra-formula in the natural as well as the reverse order.

Beginning:

अथ विद्यान्यासः —

अस्य श्रीविद्यासम्पुटितमातृकान्यासस्य दक्षिणामूर्तिः ऋषिः, पङ्क्तिश्छन्दः, श्रीमहात्रिपुरसुन्दरी देवता; ऐं क ४ व्यञ्जनानि बीजानि, सौः स ३ स्वराश्शक्तयः, क्लीं ह ५ व्यक्तयः कीलकं, ममेष्टदेवताप्रीतये विद्यासम्पुटितमातृकान्यासे विनियोगः ।

End:

ऐं ह्रीं श्रीं क १४ अं नमः स ३ ह ५ क ४ श्रीं ह्रीं ऐं इत्यादिक्षान्तं न्यसेत् ॥

Colophon:

इति विद्यासम्पुटितमातृकान्यासः ॥

No. 7222. विद्यासंपुटितमातृकासरस्वतीमन्त्रः.

VIDYĀSAṀPUṬITAMĀTṚKĀSARASVATĪMANTRAḤ.

Page, 1. Lines, 5 on a page.

Begins on fol. 140*b* of the MS. described under No. 537.

Complete.

Similar to the above. This Nyāsa is intended to serve as preliminary in relation to the repetition of the Śrīvidyā-mantra.

Beginning:

अस्य श्रीविद्यासंपुटितमातृकासरस्वतीमन्त्रस्य दक्षिणामूर्तिः ऋषिः, पङ्क्तिश्छन्दः, श्रीविद्यासंपुटितमातृका सरस्वती देवता, ऐं क ए बीजं, क्लीं ह स शक्तिः, सौः स क कीलकं, ममोपास्यमानश्रीविद्याङ्गत्वेन श्रीविद्यासंपुटितमातृकासरस्वती(न्यासे) विनियोगः ।

End:

ऐं ह्रीं श्रीं क ए ह स स क अं क ए ह स स क नमः इति क्षन्नमः-पर्यन्तम् ॥

No. 7223. विद्युज्जिह्वामन्त्रः.

VIDYUJJIHVĀMANTRAḤ.

Page, 1 Lines, 27 on a page.

Begins on fol. 252*a* of the MS. described under No. 581, wherein it is found in the Mantramālikā 229*a* in the list of other works.

Complete.

The repetition of this Mantra which is addressed to a certain Yakṣiṇī designated Vidyujjihvā (having a tongue resembling the lightning) is considered to have the power of revealing to one all the past and future events.

Beginning:

ओं करङ्कमुखे विद्युज्जिह्वे ओं भूं चटके जः जः ओं स्वाहा ।

नित्यमष्टोत्तरशतं जप्त्वा यत्किञ्चित्स्वात्मभोजनम् ।
तद्बलिं दीयते तस्यै वदानो मासमेकतः ॥

End:

अतीत्यानागतं कर्म स्वस्था स्वस्थं ब्रुवेत्तु सा ।
प्रतिमान् पर्वतान् सर्वान् चालयत्येव रक्षणात् ॥

No. 7224. विद्युज्जिह्वामन्त्रः.

VIDYUJJIHVĀMANTRAḤ.

Page, 1. Lines, 18 on a page.

Begins on fol. 298*b* of the MS. described under No. 5477, wherein it is found in the Mantramālikā 273*a* contained in the list of other works.

Complete.

Same as the above.

No. 7225. विद्युज्जिह्वामन्त्रः.

VIDYUJJIHVĀMANTRAḤ.

Page, 1. Lines, 10 on a page.

Begins on fol. 99*b* of the MS. described under No. 5566, wherein this Mantra has been omitted to be included in the list of other works

Complete.

Same as the above.

No. 7226. विनायकाष्टाक्षरमन्त्रः.

VINĀYAKĀṢṬĀKṢARAMANTRAḤ.

Page, 1. Lines, 8 on a page.

Begins on fol. 29*b* of the MS described under No. 5786.

Complete.

The repetition of this Mantra consisting of eight syllables is intended to propitiate Vināyaka. The syllable Ōṁ, occurring both in the beginning and in the end, is not to be taken as forming part of the Mantra.

Beginning :

गुरुनमस्कारः । ओं क्षिप्रप्रसादाय नमः इति प्राणायामः (१२).

* * * *

अस्य श्रीविनायकाष्टाक्षरमन्त्रस्य कौशिको ब्रह्मा वा ऋषिः, गायत्री छन्दः, विनायको देवता ; विनायकप्रेरणया विनायकप्रीत्यर्थे जपे विनियोगः ।

End :

ओं क्षिप्रप्रसादाय नमः ओं इति जपः । उपसंहारः पूर्ववत् ॥

No. 7227. विभूतिमन्त्रः.

VIBHŪTIMANTRAḤ.

Pages, 3. Lines, 4 on a page.

Begins on fol. 16*b* of the MS. described under No. 6600, wherein this Mantra has been omitted to be included in the list of other works.

Complete.

This Mantra is repeated by Śaivas while putting on the holy ashes.

Beginning :

अग्निरिति भस्म, वायुरिति भस्म, जलमिति भस्म, स्थलमिति भस्म, व्योमेति भस्म. . . . . .

श्रीकरं च पवित्रं च रोगशोकनिवारणम् ।
लोकवश्यकरं पुण्यं भस्म त्रैलोक्यपावनम् ॥

End:

कर्णौ द्वौ शिवरुद्रं च कट्यां चैव महेश्वरम् ।
बहिः कण्ठे पशुपतिं शिवश्श्रीरुद्रमेव च ॥

No. 7228. विमुक्तबन्धनसुदर्शनमन्त्रः.
VIMUKTABANDHANASUDARŚANAMANTRAḤ.

Pages, 6. Lines, 6 on a page.

Begins on fol. 15*a* of the MS. described under No. 5822, wherein it is given as Vimuktabandhanamantra.

Complete.

This Mantra is addressed to Viṣṇu's "Discus," conceived as capable of going to any place whatsoever without any restraint for the accomplishment of desired objects.

Beginning:

अथ विमुक्तबन्धनमन्त्रः—

ओं नमो भगवते महोग्रदिग्विमुक्तबन्धनसुदर्शनाय अष्टादशबाहु-द्यु(ति)दिग्विमुक्तबन्धनाय महाज्वालामालाय ।

End:

ह्रीं ज्वालाचक्राय अधःपाताला(दि)दिग्विमुक्तबन्धनाय स्वाहा । श्रीं दीप्तचक्राय ऊर्ध्वप्रदेशदिग्विमुक्तबन्धनाय स्वाहा । भूर्भुवस्सुवरों ॥

Colophon:

इति दिग्विमुक्तबन्धः ॥

No. 7229. विश्वरूपधरगोपालमन्त्रः.
VIŚVARŪPADHARAGŌPĀLAMANTRAḤ.

Pages, 2. Lines, 5 on a page.

Begins on fol. 56*a* of the MS. described under No. 5885.

Complete.

The repetition of this Mantra is held to please Kṛṣṇa conceived as having assumed an all-comprehensive universal form.

Beginning:

अस्य श्रीविश्वरूपधरगोपालमन्त्रस्य नारद ऋषिः, गायत्री छन्दः, विश्वरूपधरगोपालो देवता; अं कं खं गं घं ङं आं बीजं, इं चं छं जं झं ञं ईं शक्तिः, उं टं ठं डं ढं णं ऊं कीलकं, विश्वरूपधरगोपालप्रीत्यर्थे जपे विनियोगः ।

End:

मनुः—

बिन्दुयुक्तपञ्चाशद्वर्णात्मकमन्ते कृष्णाय गोविन्दाय गोपीजनवल्लभाय स्वाहा ॥

No. 7230. विवाहगौरीमन्त्रः.

VIVĀHAGAURĪMANTRAḤ.

Page, 1. Lines, 4 on a page.

Begins on fol. 1*a* of the MS. described under No. 5639.

Complete.

This Mantra is addressed to Pārvatī conceived as going through the ceremony of marriage with Paramaśiva.

Beginning:

अस्य श्रीविवाहगौरीमन्त्रस्य ब्रह्मा ऋषिः, गायत्री छन्दः, श्रीविवाहगौरी देवता, मम विवाहगौरीप्रसादसिद्ध्यर्थे जपे विनियोगः ।

End:

ओं कालि कालि . . . . वन्नं देहि कुरु कुरु स्वाहा ॥

उमासन्निधौ लक्षजपसिद्धिः ॥

No. 7231. विषहरनारसिंहमालामन्त्रः.

VIṢAHARANĀRASIṀHAMĀLĀMANTRAḤ.

Page, 1. Lines, 6 on a page.

Begins on fol. 57*a* of the MS. described under No. 5819, wherein it is given as Nārasiṁhamālāmantra.

Complete.

The due repetition of this Mantra, which is in praise of Nṛsiṁha, is believed to be efficacious in removing the evil effect of poisons of various kinds and in counteracting the effects of hostile Mantras.

Beginning :

ओं नमो भगवते नारसिंहाय तीक्ष्णदंष्ट्राय बभ्रुकेसराय सर्वरोग-विनाशाय सर्वभयनिवारणाय ।

End :

सर्वविषदृष्टिविनाशाय परविद्याच्छेदनाय दह दह पच पच भक्षय भक्षय हुं फट् स्वाहा ॥

Colophon :

इति विषहरनारासिंहमन्त्रस्समाप्तः ॥

No. **7232.** विषहरमन्त्रः.

VIṢAHARAMANTRAḤ.

Page, 1. Lines, 18 on a page.

Begins on fol. 302*b* of the MS. described under No. 5477, wherein it is found in the Mantramālikā 270*a* in the list of other works.

Complete.

Similar to the above.

Beginning and **End :**

ओं ह्रीं ह्रीं ह्रं वह्निवासिन्यै नमः ॥

Colophon :

इति सकलविषहरमन्त्रः ॥

ध्यानम्—पिङ्गाक्षि पीताम्बरधारिणि ऊर्ध्वकेशिनि उन्मत्तस्थानि त्रिशूलधारिणीति ॥

No. 7233. विषूचिकामन्त्रः.
VIṢŪCIKĀMANTRAḤ.

Substance, palm-leaf. Size, $15\frac{5}{8} \times 1\frac{1}{8}$ inches. Pages, 3. Lines, 4 on a page. Character, Grantha. Condition, good. Appearance, old.

Begins on fol. 45*a*. The other works herein are Karmaprakāśikā 1*a*, Vaṭuniyamavidhi 44*a*, Aśvatthastōtra 47*a*, Sōmavārāśvatthapūjāvidhi 50*a*.

Complete.

This Mantra is addressed to Viṣṇu's Śakti conceived as the presiding deity of cholera; and its repetition is believed to be efficacious in driving away cholera.

Beginning:

प्रविश्य हृदयं प्राणैः पद्मप्लीहादिबाधनैः ।
वातलेखात्मको व्याधिर्भविष्यसि (ति) विषूचिका ॥

* * * *

गुणिनि त्वच्चिकित्सार्थं मन्त्रोऽयं तु मयोच्यते ॥

ओं ह्रां ह्रीं विष्णुशक्तये नमः । ओं नमो भगवति विष्णुशक्ति एह्येहि हर हर हन हन घन घन ।

End:

विषूचिके हिमवन्तं गच्छ यावच्चन्द्रमण्डलं गतोऽसि स्वाहा ॥
इति मन्त्री महामन्त्रं न्यस्य वामकरोदरे ।
मार्जयेदातुराकारं तेन हस्तेन संयतः ॥

* * * *

अथ प्रादेशमात्राङ्गी ततोऽप्यङ्गुलिरूपिणी ।
ततो माषश(षांशतु)लच्या(सा)ततस्सूची बभूव सा ॥

No. 7234. विष्णुकवचः.
VIṢṆUKAVACAḤ.

Pages, 3. Lines, 8 on a page.

Begins on fol. 49*b* of the MS. described under No. 5786.

Complete; as found in the sixth Adhyāya of the Tulākāvērīmāhātmya which is dealt with in the Āgnēyapurāṇa.

The repetition of this Kavacamantra addressed to Viṣṇu is believed to be efficacious in securing protection and victory, in the curing of diseases and in the destruction of one's enemies, etc.

Beginning:

हरिश्चन्द्रः—

ब्रह्मन् श्रीविष्णुकवचं कीदृशं किंप्रभावकम् ।
केनोक्तं को मुनिश्छन्दो दैवतं कीदृशं मुने ॥

* * * *

पूर्वतो मां हरिः पातु पश्चाच्चक्री च दक्षिणे ।
कृष्ण उत्तरतः पातु श्रीशो विष्णुश्च सर्वशः ॥

End:

इदं श्रीविष्णुकवचं सर्वमङ्गलदायकम् ।
सर्वरोगप्रशमनं सर्वशत्रुप्रणाशनम् ॥
एवं जप्त्वा तु तत्काले ह्यात्मरक्षाकरं परम् ।
त्रिसन्ध्यं यः पठेच्छुद्धः सर्वत्र विजयी भवेत् ॥

Colophon:

इति श्रीमदाग्नेयपुराणे तुलाकावेरीमाहात्म्य षष्ठाध्याये अगस्त्य हरिश्चन्द्रसंवादे श्रीविष्णुकवचस्तोत्रं सम्पूर्णम् ॥

No. 7235. विष्णुकवचः.

VIṢṆUKAVACAḤ.

Pages, 3. Lines, 5 on a page.

Begins on fol. 15*a* of the MS. described under No. 5938.
Complete.
Similar to the above.

Beginning:

अस्य श्रीविष्णुकवचस्तोत्रमन्त्रस्य ब्रह्मा ऋषिः, गायत्री छन्दः, श्रीमहाविष्णुः परमात्मा देवता; ओं बीजं, लक्ष्मीश्शक्तिः, नमः कील(कं), मम सर्वाभीष्टसिद्ध्यर्थे वि(नि)योगः । . . . .

* * * *

पादौ रक्षतु गोविन्दो गुल्फे रक्षेज्जनार्दनः ।
जङ्घे रक्षेद्धरिः पातु जान्वो रक्षेत्त्रिविक्रमः ॥

End:

भुवनं चतुर्दशं दिव्यं वैनतेयेन रक्षितम् ।
पूर्वायां पुण्डरीकाक्ष आग्नेय्यां माधवस्तथा ॥
दक्षिणे नारसिंहश्च . . . . . ।
मुच्यते सर्वपापेभ्यो विष्णुलोकं स गच्छति ।
विष्णुलोकं स गच्छत्यों नम इति ॥

Colophon:

इति श्रीविष्णुकवचं संपूर्णम् ॥

No. 7236. विष्णुपञ्जरमन्त्रः.
VIṢṆUPAÑJARAMANTRAḤ.

Pages, 2. Lines, 8 on a page.

Begins on fol. 99*b* of the MS. described under No. 3680, wherein it is wrongly stated as beginning on fol. 99*a*.

Complete.

Similar to the above.

Beginning:

विष्णुपञ्जरमाहात्म्यं सर्वदुःखनिवारणम् ।
उग्रं तेजो महावीर्यं सर्वशत्रुनिकृन्तनम् ॥
त्रिपुरे दह्यमाने तु हरेण ब्रह्मणात्मनः ।
तदर्थं सम्प्रवक्ष्यामि आत्मरक्षासुखावहम् ॥

पादौ रक्षतु गोविन्दो जङ्घे पातु त्रिविक्रमः ।
ऊरू मे केशवः पातु कटिं दामोदरोऽवतु ॥

End :

जले रक्षतु वाराहस्तले रक्षतु वामनः ।
अटव्यां नारसिंहोऽपि सर्वतः पातु केशवः ॥

Colophon :

विष्णुपञ्जरं सम्पूर्णम् ॥

No. **7237.** विष्णुपञ्जरमन्त्रः.
VIṢṆUPAÑJARAMANTRAḤ.

Pages, 2. Lines, 5 on a page.

Begins on fol. 191*a* of the MS. described under No. 5661.

Complete; as found in the Brahmāṇḍapurāṇa.

The repetition of this Mantra, which is also addressed to Viṣṇu, is believed to have the power to secure protection to one from all kinds of dangers. Some of the good results believed to be due to the repetition of this Mantra are given in the last stanza.

Beginning :

अस्य श्रीविष्णुपञ्जरस्तोत्रमन्त्रस्य ब्रह्मा ऋषिः, ईश्वरो देवता, मम शरीरसंरक्षणार्थे जपे विनियोगः ।

* * * *

पादौ रक्षतु गोविन्दो जङ्घे पातु त्रिविक्रमः ।
ऊरू(ममा)च्युतो रक्ष(क्षेत) गुह्यं रक्षतु माधवः ॥

End :

विष्णुपञ्जरसंयुक्तो विचरेच्च महीपतिः ।
राजद्वारे बिलद्वारे प्रदेशे भूतसङ्कुले ॥

* * * *

अपुत्रो लभते पुत्रं धनहीनो लभेद्धनम् ।
मुच्यते सर्वपापेभ्यो विष्णुलोकं स गच्छति ॥

Colophon :

इति ब्रह्माण्डपुराणे त्रिपुरदहनकाले पार्वतीपरमेश्वरसंवादे श्रीविष्णु-पञ्जरस्तोत्रं सम्पूर्णम् ॥

No. **7238.** विष्णुपञ्जरमन्त्रः.

VIṢṆUPAÑJARAMANTRAḤ.

Pages, 2. Lines, 21 on a page.

Begins on fol. 10*a* of the MS. described under No. 2373, wherein it has been omitted to be included in the list of other works given therein.

Complete.

Similar to the above

Beginning :

पादौ मे पातु गोविन्दः जङ्घे चापि त्रिविक्रमः ।
ऊरू च केशवो रक्षेत् कटिं चैव जनार्दनः ॥
नाभिं तु भार्गवो रक्षेत् गुह्यं रक्षतु वामनः ।

End :

सन्नुतं सर्वगात्रेषु प्रविष्टो विष्णुपञ्जरम् ॥
पञ्जरश्च प्रविष्टोऽभूत् विचरामि महीतले ।
नदीतटे महारण्ये चोरव्याघ्रभयेषु च ॥
डाकिनीभूतबेताले भयं नास्ति कदाचन ।
रोगार्तो मुच्यते रोगात् स नरश्रियमाप्नुयात् ॥

No. **7239.** विष्णुपञ्जरमन्त्रः.

VIṢṆUPAÑJARAMANTRAḤ.

Pages, 3. Lines, 6 on a page.

Begins on fol. 1*a* of the MS. described under No. 2190, wherein it is given as Viṣṇupañjarakavaca.

Complete.

Same as the work described under number 6473.

No. 7240. विष्णुमन्त्रः—न्याससहितः.

VIṢṆUMANTRAḤ WITH NYĀSA.

Pages, 5. Lines, 21 on a page.

Begins on fol. 8*a* of the MS. described under No. 2373, wherein it has been omitted to be included in the list of other works.

Complete.

This Mantra is addressed to Viṣṇu. Preliminary to the repetition of this Mantra, the touching of the various parts of one's body, repeating the several names of Viṣṇu, is enjoined.

Beginning :

अव्यग्रचित्तः कुर्वीत न्यासकर्म यथाविधि ।
करन्यासं पुरा कृत्वा ततोऽङ्गन्यासमाचरेत् ॥
अङ्गुष्ठाग्रे तु गोविन्दं तर्जन्यां तु महीधरम् ।
मध्यमायां हृषीकेशमनामिक्यां त्रिविक्रमम् ॥

End :

मनुः—
ओं नमो विष्णवे केशवाय सर्वक्लेशापहर्त्रे नमः ॥
अष्टोत्तरं वा सहस्रं वा जपं कुर्यात् ।
अस्य श्रीसंवित्परमेश्वरीमन्त्रस्य आनन्दभैरव ऋषिः, अमृतविराट् छन्दः, श्रीसंवित्परमेश्वरी देवता; ऐं बीजं, सौः शक्तिः, क्लीं कीलकं, मम संवित्परमेश्वरीप्रसादसिद्ध्यर्थे जपे विनियोगः ।

End:

ऐं क्लीं सौः सर्वतत्त्वं महाकारणदेहं परिशोधयामि जुहोमि स्वाहा ।
भङ्गिभङ्गि महाभङ्गि भवभङ्गीविमोचनि ।
मम शत्रुमनोभङ्गं कुरु कुरु हुं फट् स्वाहा ॥

* * * *

मात्राभिर्दशषोडशस्वरयुतं ज्योतिर्विशुद्धात्मकं
हंक्षेत्यक्षरयुग्मपत्रकमलं मुक्ताभमाज्ञापुरम् ।
तस्मादूर्ध्वमुखं सदाशिवमयं पद्मं सहस्रच्छदं
नित्यानन्दमयं सदा शिवमयं हं सं सदा भावये ॥

No. 7464. संवित्सेवनामन्त्रः

SAṀVITSĒVANĀMANTRAH.

Pages. Lines, 7 on a page.

Begins on fol. 11*a* of the MS. described under No. 673, wherein it is found in the Ṣaḍāmnāyamantra 1*a* in the list of other works.

Complete.

The use of the intoxicating Indian hemp followed by the repetition of this Mantra is considered to have the power to enable one to become inspired with the spiritual enlightenment needed for realizing the identity of one's self with the supreme Brahman.

Beginning:

अस्य श्रीसंवित्सेवनामन्त्रस्य आनन्दभैरव ऋषिः, अमृतविराट् छन्दः, कुरुकुल्लाशिनी महाभैरवी देवता ; ऐं बीजं, सौः शक्तिः, क्लीं कीलकं, मम संवित्सेवने विनियोगः ।

End:

ऐं सिद्धमौलि सम्यग्भूतिं कुरु कुरु सम्य(संवि)द्रूपधारिणि सां बोधय बोधय स्वाहा । . . . . . .

अहमस्मि ब्रह्माहमस्मि; अहमेवाहं मां जुहोमि स्वाहा—इति मन्त्रेण संवित्सेवनं कुर्यात् ॥

No. 7465. संवित्सेवनामन्त्रः.
SAṀVITSĒVANĀMANTRAḤ.

Pages, 2. Lines, 5 on a page.

Begins on fol. 144*a* of the MS. described under No. 673, wherein it is given as Samviddēvīmantra in the list of other works.

Complete.

Similar to the above.

Beginning:

अस्य श्रीसंवित्सेवनामन्त्रस्य आनन्दभैरव ऋषिः, अमृतविराट् छन्दः, कुरुकुल्लाशिनी महाभैरवी देवता; ऐं बीजं, क्लीं शक्तिः, सौः कीलकं, मम संवित्सेवने जपे विनियोगः ।

End:

ऐं सिद्धमौलिश्रिया देवि ज्ञानबोधप्रबोधनि । राजव्रजवशीकरिणि कालकण्ठि त्रिशूलिनि । ऐं सिद्धमौलि सम्यग्भूतिं कुरु कुरु सम्यग्रू(संविद्रू)-पधारिणि मां बोधय बोधय स्वाहा—इति त्रिवारं गुरून् सन्तर्प्य शेषं स्वीकृत्य (कुर्यात्) ॥

No. 7466. संविन्मन्त्रः.
SAṀVINMANTRAḤ.

Pages, 3. Lines, 14 on a page.

Begins on fol. 257*a* of the MS. described under No. 424, wherein it is given as Samviccūlinīmantra in the list of other works.

Complete

This Mantra is addressed to the hemp plant which is itself held to represent the goddess Śūlinī.

Beginning:

अस्य श्रीसमिध्(संवि)न्महामन्त्रस्य आनन्दभैरव ऋषिः, समि(संवि)-च्च(त्स्व)रूपिणी शूलिनी देवता; ऐं बीजं, क्लीं शक्तिः, सौः कीलकं, मम समिंदे(संविद्दे)विप्र -गः ।

End:

शत्रुक्षयं चक्रमुद्रां ज्ञानमुद्रात्मबोधिनीम् ।
सन्धानयोनिमुद्राश्च ऐश्वर्यं धेनुमुद्रयोः ॥

त्रेतायां शोणितप्रभोश्यावर्णकलयुगेमां(?) जुहोमि स्वाहा ॥ ऋषस्य चरमामृतम् ॥

No. 7467. संहारभैरवमन्त्रः.
SAṀHĀRABHAIRAVAMANTRAḤ.

Pages, 2. Lines, 20 on a page.

Begins on fol. 1*a* of the MS. described under No. 2373.

Complete.

This Mantra is addressed to Bhairava as engaged in the act of destruction.

Beginning:

अस्य श्रीसंहारभैरवमहामन्त्रस्य विश्वामित्र ऋषिः, गायत्री छन्दः, आदिनाथभैरवो देवता ; क्षां बीजं, क्षीं शक्तिः, क्षूं कीलकं, संहार-भैरवप्रसादसिद्ध्यर्थे जपे विनियोगः ।

End:

ओं ह्रीं क्षं क्षेत्रपालाय नमः । लक्षजपेन सिद्धिर्भवति ॥

No. 7468. संहारभैरवमन्त्रः.
SAṀHĀRABHAIRAVAMANTRAḤ.

Page, 1. Lines, 6 on a page.

Begins on fol. 1*a* of the MS. described under No. 365.

Complete.

Same as the above

No. 7469. सङ्गीतमातङ्गीमन्त्रः.
SAṄGĪTAMĀTAṄGĪMANTRAḤ.

Pages, 2. Lines, 14 on a page.

Begins on fol. 13*a* of the MS. described under No. 5673, wherein it is found in Āmnāyamantramālikā 1*a* in tha list of other works.

Complete.

The repetition of this Mantra, which is addressed to Mātaṅgī, is considered to have the power to enable one to become well-versed in the art of music.

Beginning :

अस्य श्रीसङ्गीतमातङ्गीमहामन्त्रस्य नारदभगवान् ऋषिः, त्रिष्टुप् छन्दः, श्रीसङ्गीतमातङ्गी देवता ; ओं बीजं, स्वाहा शक्तिः, ओं कीलकं, मम सकलसङ्गीतविशारद(त्व)ार्थे श्रीसङ्गीतमातङ्गीप्रसादसिद्ध्यर्थे जपे विनियोगः ।

End :

ओं नमो भगवति विं वीणायै मम सङ्गीतविद्यां प्रबोधय प्रबोधय स्वाहा । श्रीसङ्गीतमातङ्गीश्री ॥

No. 7470. सङ्गीतविद्यामन्त्रः.

SAṄGĪTAVIDYĀMANTRAḤ.

Page, 1. Lines, 4 on a page.

Begins on fol. 29*a* of the MS. described under No. 2848, wherein it is found in the Āmnāyamantramālikā 16*a*. For Pūrvāmnāyamantramālikā 16*a* in the list of other works therein given, read Āmnāyamantramālika 16*a*.

Complete.

Similar to the above.

Beginning and **End :**

कामनानुगुणगानकल्पनाकल्पाशिल्पतरुणीपुरस्सरा(म्) ।
वैणुकीस्तनतटीविहारिणीं वल्लकीं मनसि भावयाम्यहम् ॥
ऐं वीणायै मम सङ्गीतविद्यां प्रयच्छ स्वाहा ॥

No. 7471. सन्तानगोपालमन्त्रः.

SANTĀNAGŌPĀLAMANTRAḤ.

Page, 1. Lines, 5 on a page.

Begins on fol. 145*a* of the MS. described under No 673.

Complete.

The Mantra described under No. 5970 is the same as that given here.

The preliminary details alone slightly differ.

Beginning:

अस्य श्रीसन्तानगोपालमन्त्रस्य दूर्वास ऋषिः, अनुष्टुप् छन्दः, मम पुत्रप्रदश्रीगोपालकृष्णो देवता, मम सुपुत्रावाप्त्यर्थे विनियोगः ।

End:

देवकीसुत गोविन्द वासुदेव जगत्पते ।
देहि मे तनयं देव त्वामहं शरणं गतः ॥
नित्यमष्टशतं जप्त्वा पुत्रप्राप्तिर्भविष्यति ।

No. **7472.** सन्तानगोपालमन्त्रः.
SANTĀNAGŌPĀLAMANTRAḤ.

Page, 1. Lines, 19 on a page.

Begins on fol. 21*b* of the MS. described under No. 2886.

Complete.

The Mantra here given is the same as in the above; the preliminary details alone are somewhat different.

Beginning:

अस्य श्रीसन्तानगोपालमहामन्त्रस्य नारदो भगवानृषिः, अनुष्टुप् छन्दः, देवकीसुतेति बीजं, गोविन्देति शक्तिः, वासुदेवेति कीलकं, सन्तानगोपालप्रसादसिद्ध्यर्थे जपे विनियोगः ।

End:

देवकीसुत गोविन्द वासुदेव जगत्पते ।
देहि मे तनयं कृष्ण त्वामहं शरणं गतः ॥

No. **7473.** सन्तानगोपालमन्त्रः.

SANTĀNAGŌPĀLAMANTRAḤ.

Page, 1. Lines, 6 on a page.

Begins on fol. 39*a* of the MS. described under No. 3056.

Complete.

Similar to the above.

Beginning :

अस्य श्रीसन्तानगोपालमहामन्त्रस्य नारदभगवानृषिः, अनुष्टुप् छन्दः, श्रीसन्तानगोपालश्रीकृष्णो देवता ; क्लीं बीजं, स्वाहा शक्तिः, ओं कीलकं, सन्तानगोपालप्रीत्यर्थे जपे विनियोगः ।

End :

मन्त्रः--

देवकीसुत गोविन्द वासुदेव जगत्पते ।
देहि मे तनयं कृष्ण त्वामहं शरणं गतः ॥

No. **7474.** सन्तानगोपालमन्त्रः.

SANTĀNAGŌPĀLAMANTRAḤ.

Pages, 2. Lines, 5 on a page.

Begins on fol. 52*b* of the MS. described under No. 5885, wherein it is given as Santānapradagōpālamantra.

Complete.

Similar to the above.

Beginning :

अस्य श्रीसन्तानप्रदगोपालमन्त्रस्य नारद ऋषिः, अनुष्टुप् छन्दः, सन्तानप्रदगोपालो देवता, देवकीसुत गोविन्देति बीजं, वासुदेव जगत्पते इति शक्तिः, देहि मे तनयं कृष्ण इति कीलकं, सन्तानप्रदगोपाल-प्रीत्यर्थे जपे विनियोगः ।

End :

देवकीसुत गोविन्द वासुदेव जगत्पते ।
देहि मे तनयं कृष्ण त्वामहं शरणं गतः ॥

No. 7475. सन्तानगोपालमन्त्रः.

SANTĀNAGŌPĀLAMANTRAḤ.

Pages, 4. Lines, 5 on a page.

Begins on fol. 35*a* of the MS. described under No. 5818.

Complete.

Similar to the above.

How the various letters of this Mantra are to be inscribed on the consecrated metallic plate is mentioned at the end.

Beginning:

एवङ्गुणविशेषणविशिष्टा(यां)शुभतिथौ अस्माकं सहकुटुम्बानां क्षेमस्थैर्यविजयायुरारोग्यैश्वर्याभिवृद्ध्यर्थं. . . . . सत्सन्तानसौभाग्यसिद्ध्यर्थं सन्तानगोपालमहामन्त्रजपं करिष्ये —

अस्य श्रीसन्तानगोपालमहामन्त्रस्य नारद ऋषिः, अनुष्टुप् छन्दः, श्रीसन्तानगोपालकृष्णपरमात्मा देवता; क्लीं बीजं, स्वाहा शक्तिः, श्रीं कीलकं, मम सन्तानगोपालप्रसादसिद्ध्यर्थे जपे विनियोगः ।

End:

ओं क्लीं ह्रीं श्रीं देवकीसुत गोविन्द वासुदेव जगत्पते ।
देहि मे तनयं कृष्ण त्वामहं शरणं गतः ॥

वसुदले मूलमन्त्रं चतुस्सङ्ख्यया लिखेत् । शिष्टमेकदले । भूपुरेषु अकरादिक्षकारान्तं लिखेत् । दिक्पालकबीजं भूपुरस्याष्टकोणे लिखेत् ॥

Colophon:

इति सन्तानगोपालयन्त्रः ॥

No. 7476. सन्तानगोपालमन्त्रः.

SANTĀNAGŌPĀLAMANTRAḤ.

Page, 1. Lines, 8 on a page.

Begins on fol. 16*b* of the MS. described under No. 2854, wherein it has been apparently omitted to be included in the list of other works given therein.

Complete.

Similar to the above.

Beginning:

अस्य श्रीसन्तानगोपालमन्त्रस्य नारद ऋषिः, अनुष्टुप् छन्दः, श्रीसन्तानगोपालकृष्णो देवता, क्लीं बीजं, श्रीं शक्तिः, देवकीसुत इति कीलकं, सन्तानगोपालप्रीत्यर्थे जपे विनियोगः ।

End:

ओं क्लीं देवकीसुत गोविन्द वासुदेव जगत्पते ।
देहि मे तनयं कृष्ण त्वामहं शरणं गतः ॥

No. **7477.** सन्तानगोपालमन्त्रः.

SANTĀNAGŌPĀLAMANTRAḤ.

Page, 1. Lines, 6 on a page.

Begins on fol. 43*a* of the MS. described under No. 5858.

Complete.

Similar to the above.

Herein the Mantra in praise of Nṛsiṁha, which is in the Anuṣṭup metre, is enjoined to be repeated after the repetition of the Santānagōpālamantra.

Beginning:

अस्य श्रीसन्तानगोपालमहामन्त्रस्य नारदभगवानृषिः, अनुष्टुप् छन्दः, परमात्मा श्रीसन्तानगोपालो देवता ; क्लीं बीजं गोविन्देति शक्तिः, वासुदेवेति कीलकं, मम पुत्रसन्तानार्थे जपे विनियोगः ।

End:

देहि मे तनयं कृष्ण त्वामहं शरणङ्गतः ॥ मनुः--

ओं क्लीं स्वाहा ॥

अनुष्टुप्मन्त्रराजस्य(जान्ते) नारसिंहं स्मरेत्ततः ।
उग्रवीरं महाविष्णुं ज्वलतं सर्वतोमुखम् ॥

नृसिंहं भीषणं भद्रं मृत्युं मृत्योर्नमाम्यहम् ॥
त्रिकालं जपतां सन्तानसिद्धिः॥

Colophon:

इति सन्तानगोपालमन्त्रः ॥

No. 7478. सन्ध्यामन्त्रः.
SANDHYĀMANTRAḤ.

Pages, 32. Lines, 5 on a page.

Begins on fol. 1*a* of the MS. described under No. 5660.

Complete.

This is the daily prayer to be offered by the followers of the Yajurvēda three times a day, viz., in the morning, at noon and in the evening.

Beginning:

अपवित्रः पवित्रो वा सर्वावस्थां गतोऽपि वा ।
यस्स्मरेत् पुण्डरीकाक्षं स बाह्याभ्यन्तरश्शुचिः ॥

केशवाय स्वाहा, नारायणाय स्वाहा, माधवाय स्वाहा । गोविन्दाय नमः, विष्णवे नमः, मधुसूदनाय नमः, त्रिविक्रमाय नमः । . . . .

पृथिव्या मेरुपृष्ठ ऋषिः, कूर्मो देवता, सुतलं छन्दः, आसने विनियोगः । प्रणवस्य परब्रह्म ऋषिः, परमात्मा देवता, देवी गायत्री छन्दः, प्राणायामे विनियोगः ।

End:

सर्वा ता विष्य शिथिरेव देवा अथा ते स्याम वरुण प्रियासः । ओं नमः प्रतीच्यै दिशे याश्च देवता एतस्यां प्रतिवसन्त्येताभ्यश्च नमो नमः ॥

Colophon:

इति त्रिकालसन्ध्या समाप्ता ॥

No. 7479. सन्ध्यामन्त्रः.

SANDHYĀMANTRAḤ.

Pages, 8. Lines, 6 on a page.

Begins on fol. 64*a* of the MS. described under No. 5660.

Incomplete.

Similar to the above. This form of the prayer is intended for Śaivas.

Beginning:

पृथिव्या मेरोः पृष्ठ ऋषिः, कूर्मो देवता, सुतलं छन्दः, आसने विनियोगः ।

अपवित्रः पवित्रो वा सर्वावस्थां गतोऽपि वा ।
यस्स्मरेत् गिरिजाधीशं स बाह्याभ्यन्तरश्शुचिः ॥

केशव, नारायण, माधव, गोविन्द, विष्णु, मधुसूदन, त्रिविक्रम, वामन, श्रीधर, हृषीकेश, पद्मनाभ, दामोदर, सङ्कर्षण, वासुदेव, प्रद्युम्न, अनिरुद्ध ।

End:

पूतं पवित्रेणैवाज्यम् । आपश्शुन्धन्तु मैनसः । ओं भूर्भुवस्सुवः । तत्सवितुर्वरेण्यं भर्गो देवस्य धीमहि । धियो यो नः प्रचोदयात्.

No. 7480. सन्ध्यामन्त्रः.

SANDHYĀMANTRAḤ.

Pages, 6. Lines, 6 on a page.

Begins on fol. 83*a* of the MS. described under No. 217, wherein it is given as Sandhyākramaḥ in the list of other works.

Incomplete.

Same as the above.

No. 7481. सन्ध्यावन्दनमन्त्रः.

SANDHYĀVANDANAMANTRAḤ.

Pages, 2. Lines, 19 on a page.

Begins on fol. 27*b* of the MS. described under No. 2886.

Complete.

This prayer is generally offered by the Śāktas Instead of Vēḍic passages they use Dēvīmantras in their prayers ; hence it is called Tantra-sandhyāvandana.

Beginning :

अस्य श्रीसन्ध्यावन्दनमन्त्रस्य सान्दीपिनिभगवान् ऋषिः, अनुष्टुप् छन्दः, सन्ध्या देवता; शोभनवक्र(वर्ण)मिति बीजं, नीलग्रीवायेति शक्तिः, वरदाभयहस्तान्तामिति कीलकं, समस्तपापक्षयार्थे वन्दने विनियोगः ।

End :

प्रातस्सन्ध्ये परानन्दे परब्रह्मात्मिके शिवे ।
वन्दे त्वां च महाबाले गायत्री पाहि मां सदा ॥

Colophon :

इति वन्दनविधिः ॥

No. **7482.** सन्ध्यावन्दनमन्त्रः.

SANDHYĀVANDANAMANTRAḤ.

Pages, 2. Lines, 19 on a page.

Begins on fol. 32*a* of the MS. described under No. 2886.

Complete.

Similar to the above.

Beginning :

अस्य श्रीसन्ध्यावन्दनमन्त्रस्य सान्दीपिनिभगवानृषिः, अनुष्टुप् छन्दः, ब्रह्मा देवता; शोभनवर्णं कीलकं, नीलग्रीवायेति शक्तिः, मोक्षार्थे जपे विनियोगः ।

End :

पाहि पाहि महादेवि पातकादुपपातकात् ।
अपिकर्ता पिपासाच्च पाहि पाहीति मां सदा ॥

Colophon :

इति विश्वामित्रकल्पे ॥

No. 7483. सरस्वतीदेवीमन्त्रः.

SARASVATĪDĒVĪMANTRAḤ.

Page, 1. Lines, 9 on a page.

Begins on fol. 3*b* of the MS. described under No. 6548, wherein it is given as Sarasvatīmantra in the list of other works.

Complete.

This Mantra is addressed to the goddess Sarasvatī; and its repetition is considered to have the power to enable one to become a learned person and a poet.

Beginning:

अस्य श्रीसरस्वतीदेवीमहामन्त्रस्य ब्रह्मा ऋषिः, गायत्री छन्दः, श्रीसरस्वती देवी देवता; सं बीजं, स्वाहा शक्तिः, श्रीसरस्वतीदेवीप्रसाद-सिद्ध्यर्थे सारस्वतार्थे सर्वबोधनार्थे च विनियोगः ।

End:

नवनलिननिरूढा वल्लभा पद्मजस्य द्युतिविहसितचन्द्रोद्दामकान्तिः प्रसन्ना ।
विहरतु मम चित्ते सर्वबोधप्रदात्री वितरतु च कवित्वं सर्वलोकप्रसिद्धम् ॥

मन्त्रः—

ओं सं सरस्वति स्वाहा ॥

No. 7484. सरस्वतीमन्त्रः.

SARASVATĪMANTRAḤ.

Page, 1. Lines, 17 on a page.

Begins on fol. 102*b* of the MS. described under No. 5568.

Complete.

This Mantra is also addressed to Sarasvatī; and its repetition is considered to have the power to enable one to bring people under one's control and influence.

Beginning and **End**:

पुस्तकजपपटहस्ते वरदाभयचिह्नचारुबाहुलते ।
कर्पूरामलदेहे वागीश्वरि शोधयतु(याशु) मम चेतः ॥

ओं नमो भगवति वागीश्वरि सकलराजवशीकरणि सत्त्व(र्व)स्त्रीपुरुष-वशीकरणि क्लीं ह्रीं श्रीं स्वाहा ॥

No. 7485. सर्वकामदेवमनोहरामन्त्रः.

SARVAKĀMADĒVAMANŌHARĀMANTRAḤ.

Page, 1. Lines, 27 on a page.

Begins on fol. 252*a* of the MS. described under No. 581, wherein it is found in the Mantramālikā 229*a* in the list of other works.

Complete.

The repetition of this Mantra, which is addressed to a certain goddess named Sarvakāmadēvamanōharā, (one who bestows all desires and is charmingly beautiful even to the gods) is considered to have the power to enable one to obtain wealth, which must however be spent away if one wants to retain the favour of the goddess.

Beginning and **End**:

मन्त्रः—

ओं ह्रीं सर्वकाम(दे)देवमनोहरे स्वाहा ।
नदीतीरे शुभे देशे चन्दनेन सुमण्डलम् ॥
विधाय पूजयेद्देवीं ततो मन्त्रायुतं जपेत् ।
त्रिसप्ताहं जपेदेवं प्रसन्ना वितरेत्सदा ॥
दीनाराणां सहस्रैकं व्ययं कुर्याद्दिने दिने ।
विना व्ययेन सा क्रुद्धा न ददाति कदाचन ॥

No. 7486. सर्वकामदेवमनोहरामन्त्रः.

SĀRVAKĀMADĒVAMANŌHARĀMANTRAḤ.

Page, 1. Lines, 10 on a page.

Begins on fol. 99*a* of the MS. described under No. 5566, wherein it has been omitted to be included in the list of other works.

Complete.

Same as the above.

No. 7487. सर्वकामदेवमनोहरामन्त्रः.

SARVAKĀMADĒVAMANŌHARĀMANTRAḤ.

Page, 1. Lines, 18 on a page.

Begins on fol. 298*b* of the MS. described under No. 5477, wherein it is found in the Mantramālikā 273 in the list of other works.

Complete.

Similar to the above.

Beginning:

ओं ह्रीं सर्वकाम(दे)देवमनोहरे स्वाहा ।

End:

वीणारामां (दीनारणां) सहस्रैकं व्ययं कुर्याद्दिने दिने ।
विना व्ययेन सा क्रुद्धा न ददाति कदाचन ॥

No. 7488. सर्वजनवशीकरणमन्त्रः.

SARVAJANAVAŚĪKARAṆAMANTRAḤ.

Page, 1. Lines, 22 on a page.

Begins on fol. 14*a* of the MS. described under No. 6045, wherein it has been apparently omitted te be included in the list of other works.

Complete.

This Mantra is addressed to Lakṣmī, probably conceived as a manifestation of Śakti; and its repetition is considered to be efficacious in bringing people under one's control and influence.

Beginning:

ओं ऐं श्रीं ह्रीङ्कारि महालक्ष्मि मौक्तिकालङ्कारिणि परमानन्दमानसे सर्वमोहनवशीकरणि ।

End:

मम श्रीं प्रवेशय प्रवेशय मम प्रभुवश्यं कुरु कुरु स्वाहा ॥

No. 7489. सान्दीपिपुत्रप्रदगोपालमन्त्रः.

SĀNDĪPIPUTRAPRADAGŌPĀLAMANTRAḤ.

Page, 1. Lines, 5 on a page.

Begins on fol. 49*b* of the MS. described under No. 5885.

Complete.

This Mantra is intended to propitiate Kṛṣṇa as he restored back to the sage Sāndīpi his son who had got drowned in the ocean.

Beginning:

अस्य श्रीसान्दीपिपुत्रप्रदगोपालमन्त्रस्य नारद ऋषिः, अनुष्टुप् छन्दः, श्रीसान्दीपिपुत्रप्रदायकगोपालो देवता, आं बीजं, श्रीं शक्तिः, क्रों कीलकं, सान्दीपिपुत्रप्रदायकगोपालप्रीत्यर्थे जपे विनियोगः ।

End:

आं श्रीं क्रों कृष्णाय देवकीगर्भसंभूताय ह्रीं वं स्वाहा ॥

No. 7490. साम्बदक्षिणामूर्तिमन्त्रः.

SĀMBADAKṢIṆĀMŪRTIMANTRAḤ.

Pages, 2. Lines, 6 on a page.

Begins on fol. 136*b* of the MS. described under No. 537.

Complete.

This Mantra is intended to propitiate Dakṣiṇāmūrti as associated with Ambā.

Beginning:

अस्य श्रीसाम्बदक्षिणामूर्तिमहामन्त्रस्य आनन्दवामदेव ऋषिः, अमृतविराट् छन्दः, श्रीसाम्बदक्षिणामूर्तिर्देवता; ओं ऐं बीजं, नमः क्लीं

शक्तिः, शिवाय सौः कीलकं, श्रीसाम्बदक्षिणामूर्तिप्रसादसिद्ध्यर्थे जपे विनियोगः ।

End :

पञ्चोपचारैस्संपूज्य, ओं ऐं नमः क्लीं शिवाय सौः ॥

No. **7491.** साम्बदक्षिणामूर्तिमन्त्रः.

SĀMBADAKṢIṆĀMŪRTIMANTRAḤ.

Pages, 2. Lines, 18 on a page.

Begins on fol. 309*a* of the MS. described under No. 5477, wherein it is found in the Mantramālikā 273 in the list of other works.

Complete.

Similar to the above.

Beginning :

अस्य श्रीसाम्बदक्षिणामूर्तिमन्त्रस्य आनन्दवामदेव ऋषिः, भोगपङ्क्तिश्छन्दः, शिवाय सौः कीलकं, साम्बदक्षिणामूर्तिप्रीत्यर्थे जपे विनियोगः ।

End:

ओं ऐं नमः क्लीं शिवाय सौः । पुनश्चरणं लक्षम् । दशांशं होमः । इति ॥

No. **7492.** साम्बदक्षिणामूर्तिमन्त्रः.

SĀMBADAKṢIṆĀMŪRTIMANTRAḤ.

Page, 1. Lines, 11 on a page.

Begins on fol. 252*b* of the MS. described under No. 424.

Complete.

Similar to the above.

Beginning :

अस्य श्रीसाम्बदक्षिणामूर्तिमहामन्त्रस्य आनन्दवामदेव ऋषिः, पङ्क्तिश्छन्दः, श्रीसाम्बदक्षिणामूर्तिर्देवता; ओं ऐं बीजं, नमः शक्तिः,

शिवाय सौः कीलकं, श्रीसाम्बदक्षिणामूर्तिप्रसादसिद्ध्यर्थे जपे विनियोगः ।

End:

ध्यानम्—

वामोरोरुपरि स्थितां गिरिसुतामन्योऽन्यमालिङ्गितां
श्यामामुत्पलधारिणीं शशिनिभं चालोकयन्तीं शिवम् ।
आश्लिष्टेन करेण पुस्तकमथो कुम्भं सुधापूरितं
मुद्रां ज्ञानमयीं दधानमपरां मुक्ताक्षमालां भजे ॥

मनुः ॥

No. **7493.** साम्बदक्षिणामूर्तिमन्त्रः.

SĀMBADAKṢIṆĀMŪRTIMANTRAḤ.

Pages, 3. Lines, 6 on a page.

Begins on fol. 23*a* of the MS. described under No. 5928.

Complete.

Similar to the above.

Beginning:

अस्य श्रीसाम्बदक्षिणामूर्तिमहामन्त्रस्य शुक ऋषिः, विराट् छन्दः, साम्बदक्षिणामूर्तिः परमात्मा देवता; जीवं बीजं, क्लीं नमश्शक्तिः, शिवाय सौः कीलकं, श्रीदक्षिणामूर्तिप्रीत्यर्थे जपे विनियोगः ।

End:

ओं ऐं क्लीं सौः नमाश्शिवाय पञ्चपूजां कुर्यात् । श्रीसाम्बदक्षिणामूर्तेः पादुकां पूजयामि ॥

No. **7494.** सारस्वतप्रदगोपालमन्त्रः.

SĀRASVATAPRADAGŌPĀLAMANTRAḤ.

Pages, 2. Lines, 5 on a page.

Begins on fol. 53*a* of the MS. described under No. 5885.

Complete.

This Mantra is considered to have the power to please Kṛṣṇa conceived as the bestower of learning and knowledge.

Beginning:

अस्य श्रीसारस्वतप्रदगोपालमन्त्रस्य नारद ऋषिः, अनुष्टुप् छन्दः, सारस्वतप्रदगोपालो देवता, ऐं बीजं, स्वाहा शक्तिः, ओं कीलकं, सारस्वतप्रदगोपालप्रीत्यर्थे जपे विनियोगः ।

End:

कृष्णाय गोविन्दाय गोपीजनवल्लभाय स्वाहा ॥

No. **7495.** सालग्राममन्त्रः.

SĀLAGRĀMAMANTRAḤ.

Page, 1. Lines, 6 on a page.

Begins on fol. 33*a* of the MS. described under No. 292.

Complete.

The repetition of this Mantra is considered to have the power to secure the favour of Rāma conceived as residing in Sālagrāmas and thereby to enable one to accomplish one's desires and to remove all difficulties and troubles.

Beginning:

अस्य श्रीसालग्राममन्त्रस्य श्रीवेदव्यासभगवान् ऋषिः, अनुष्टुप् छन्दः, सालग्रामवासिश्रीरामो देवता; ओं बीजं, स्वाहा शक्तिः, सालग्रामवासिश्रीरामप्रीत्यर्थे जपे विनियोगः ।

End:

ओं नमो भगवते विष्णवे सालग्रामनिवासिने सर्वाभीष्टफलप्रदाय सकलदुरितनिवारिणे सालग्रामाय स्वाहा ॥

No. **7496.** सावित्राष्टाक्षरमन्त्रः.

SĀVITRĀṢṬĀKṢARAMANTRAḤ.

Pages, 3. Lines, 5 on a page.

Begins on fol. 64*b* of the MS. described under No. 5885, wherein it is given as Sāvitrāṣṭākṣarī.

Complete.

This Mantra consisting of 8 syllables is addressed to the Sun-god; and its repetition is considered to be efficacious in the curing of various kinds of diseases, in the accomplishment of one's desires and in the attainment of salvation.

Beginning:

पूर्वोक्तएवंगुणविशेषणविशिष्टायां शुभतिथौ मम सकलपापक्षयार्थमैकाहिकद्व्याहिकत्र्याहिकचातुराहिकादिसकलरोगशान्त्यर्थं समस्तमङ्गलावाप्त्यर्थं सावित्राष्टाक्षरीमन्त्रजपं करिष्ये–अस्य श्रीसावित्राष्टाक्षरीमन्त्रस्य भार्गव ऋषिः, गायत्री छन्दः, आदित्यो देवता; कं बीजं, यं शक्तिः, दं कीलकं, मम इष्टार्थसिद्ध्यर्थे जपे विनियोगः ।

End:

ओं श्रीं ह्रीं क्लीं घृणिस्सूर्य आदित्यों ।

शुद्धात्मा रविजश्श्रीमान् तस्माद्रोगाद्विमुक्तवान् ।
अष्टाविंशतिकुष्ठानि महारोगाणि यानि च ॥
अशीतिवातरोगाश्च प्रणश्यन्ति न संशयः ।
कुर्वन्नेवंप्रकारेण भुक्तिं मुक्तिं च विन्दति ॥

No. 7497. सावित्रीपञ्जरम्.

SĀVITRĪPAÑJARAM.

Pages, 2. Lines, 19 on a page.

Begins on fol. 31*a* of the MS. described under No. 2886.

Complete as found in the 45th Adhyāya of the Vāsiṣṭha-saṁhitā.

The repetition of this Mantra which is addressed to the goddess Sāvitrī is considered to have the power to secure protection to one and to enable one to accomplish whatsoever one may desire.

Beginning:

सावित्रीपञ्जरं नाम रहस्यं निगमत्रये ।
ऋष्यादिकञ्च दिग्वर्णसाङ्गावरणसंक्रमात् ॥
वाहनायुधमन्त्रास्त्रमूर्तिध्यानपुरस्सरम् ।
स्तोत्रञ्च ते प्रवक्ष्यामि त्वयि स्नेहाच्च नारद ॥
ब्रह्मनिष्ठाय देयं स्यान्न देयं यस्य कस्यचित् ।
आचम्य नियतः पश्चादात्मध्यानपुरस्सरम् ॥
* * * *
त्रिपदा ऋङ्मयी पूर्वमुखी ब्रह्मास्त्रसंज्ञिता ।
चतुर्विंशतितत्त्वाढ्या पातु प्राचीं दिशं मम ॥

End:

किमत्र बहुनोक्तेन शृणु नारद तत्त्वतः ।
यं यं काममभिध्यायन् तं तमाप्नोत्यसंशयः ॥

Colophon:

इति श्रीवासिष्ठसंहितायां वसिष्ठपराशरसंवादे सावित्रीपञ्जरं नाम पञ्चचत्वारिंशोऽध्यायः ॥

No. 7498. साहित्यमातङ्गीमन्त्रः.
SĀHITYAMĀTAṄGĪMANTRAḤ.

Pages, 2. Lines, 14 on a page.

Begins on fol. 13*b* of the MS. described under No. 5673, wherein it is found in the Āmnāyamantramālikā 1*a* in the list of other works.

Complete.

Similar to the work described under No. 7289.

Beginning:

अस्य श्रीसाहित्यमातङ्गीमहामन्त्रस्य कृष्ण ऋषिः, गायत्री छन्दः, श्रीसाहित्यमातङ्गी देवता; ओं बीजं, स्वाहा शक्तिः, व्यं कीलकं, मम साहित्यविद्याप्रसादसिद्ध्यर्थे जपे विनियोगः ।

End:

मनुः—

ऐं ह्रीं श्रीं ओं नमो भगवते व्यं वेणवे मम साहित्यविद्यां प्रयच्छ स्वाहा । श्रीसाहित्यमातङ्गीश्री ।

* * * *

इति पूर्वाम्नायदेवताश्च मूलाधारे महीचक्रे च पूजयेत् ॥

No. **7499.** साहित्यविद्यामन्त्रः.

SĀHITYAVIDYĀMANTRAḤ.

Page, 1. Lines, 4 on a page.

Begins on fol. 29*a* of the MS. described under No. 2848, wherein it is found in the Āmnāyamantramālikā in the list of other works. For Pūrvāmnāyamantramālikā 16*a* read Āmnāyamantramālikā 16*a* in the list of other works.

Wants a portion in the beginning.

Similar to the above.

Beginning and **End:**

वक्रसौरभवशीकृतरन्ध्रो वस्तुना पटुतरावयवेन ।
गानदोहनकलाकलनादो मानदो भवतु मे मणिवेणुः ॥

ओं नमो भगवते वें वेणवे मम साहित्यविद्यां प्रयच्छ स्वाहा । साहित्यविद्यादेव्यम्बाश्री ॥

No. **7500.** सिद्धगणपतिमन्त्रः.

SIDDHAGAṆAPATIMANTRAḤ.

Page, 1. Lines, 5 on a page.

Begins on fol. 15*a* of the MS. described under No. 5639.

Complete.

The repetition of this Mantra is considered to have the power to propitiate Siddhagaṇapati, being a special manifestation of Vināyaka.

Beginning:

अस्य श्रीसिद्धगणपतिमहामन्त्रस्य वामदेव ऋषिः, निचृद्गायत्री छन्दः, महागणपतिर्देवता; ग्लां बीजं, ह्रीं शक्तिः, ग्लूं कीलकं, मम सिद्धगणपतिप्रसादसिद्ध्यर्थे जपे विनियोगः ।

End:

ओं नमो गजाननाय ओं नमः स्वाहा ॥

No. 7501. सिद्धगणपतिमालामन्त्रः.

SIDDHAGAṆAPATIMĀLĀMANTRAḤ.

Page, 1. Lines, 5 on a page.

Begins on fol. 15*a* of the MS. described under No. 5639, wherein it has been omitted to be given in the list of other works.

Complete.

Similar to the above.

The transcription of this manuscript is said to have been completed on the 2nd day of the dark fortnight of the month of Puṣya in the year Viśvāvasu by Allamudi Bāpirāju, and the transcript handed over to Kurnella Veṅkaṭarāmaśāstrin.

Beginning and **End:**

मालामन्त्रः—

ओं ह्रीं श्रीं ह्लौं ग्लौं गं गणपतये नमः वरद वरद सर्वजनं मे वशमानय स्वाहा ॥

No. 7502. सिद्धौघानन्दमन्त्रः.

SIDDHAUGHĀNANDAMANTRAḤ.

Pages, 2. Lines, 14 on a page.

Begins on fol. 3*b* of the MS. described under No. 5673, wherein it is found in the Āmnāyamantramālikā 1*a* given therein in the list of other works.

Complete.

The repetition of this Mantra is considered to have the power to propitiate the assemblage of nine Śāktagurus known as Siddhas.

Beginning:

अस्य श्रीसिद्धौघानन्दमन्त्रस्य सिद्धौघानन्दभैरव ऋषिः, अव्यक्तं छन्दः, श्रीसिद्धौघो देवता; आं बीजं, ओं शक्तिः, इं कीलकं, मम सिद्धौघानन्दप्रसादसिद्ध्यर्थे जपे विनियोगः ।

End:

करालिकाम्बासिद्धश्री ४, भीबिण्डाम्बासिद्धश्री ४, भीमाम्बासिद्धश्री ४, खराल्यम्बासिद्धश्री ४, खराननाम्बासिद्धश्री ४ विधिशालिन्यम्बासिद्धश्रीपादुकाम् ॥

No. 7503. सिद्धौघानन्दमन्त्रः.

SIDDHAUGHĀNANDAMANTRAḤ.

Pages, 3. Lines, 4 on a page.

Begins on fol. 19*b* of the MS. described under No. 2848, wherein it is found in the Āmnāyamantramālikā 16*a* in the list of other works.

Complete.

Similar to the above.

Beginning:

अस्य श्रीसिद्धौघानन्दमन्त्रस्य आनन्दभैरव ऋषिः, अव्यक्तगायत्री छन्दः, श्रीसिद्धौघो देवता; आं बीजं, ओं शक्तिः, इं कीलकं, मम श्रीनवसिद्धप्रसादसिद्ध्यर्थे विनियोगः ।

End:

मनुः—

ह्रीं श्रीं सौः आं महादुर्मरणसिद्धश्रीपादुकां . . . . . विधिशालिन्यम्बासिद्धश्री॥

No. 7504. सिद्धमूलिनीमन्त्रः.
SIDDHAMŪLINĪMANTRAḤ.

Page, 1. Lines, 10 on a page.

Begins on fol. 228*a* of the MS. described under No. 124, wherein it has been omitted to be included in the list of other works.

Complete.

This Mantra is enjoined to be repeated at the time of taking gañja (hemp) as an aid to the practice of Yōga.

Beginning:

अस्य श्रीसिद्धमूलिनीमहामन्त्रस्य सिद्धानन्दभैरव ऋषिः, अनुष्टुप् छन्दः, सिद्धमूलिनी देवता; ऐं बीजं, क्लीं शक्तिः, सौः कीलकं, मम सिद्धमूलिनीप्रसादद्वारा संवित्सेवने विनियोगः ।

End:

श्रीपरमेष्ठिगुरवे चिदाभासानन्दनाथश्री ह स क्ष म ल व र य ऊं स ह क्ष म ल व र य ईं आनन्दभैरवाय वौषट् । ललाटान्तमुद्धृत्य अर्धं ज्वलतीति जुहुयात् । श्रीं अपसर्पन्तु—शिवाज्ञया ॥

No. 7505. सिद्धलक्ष्मीयक्षिणीमन्त्रः.
SIDDHALAKṢMĪYAKṢINĪMANTRAḤ.

Page, 1. Lines, 27 on a page.

Begins on fol. 251*a* of the MS. described under No. 581, wherein it is found in the Mantramālikā 229*a* in the list of other works.

Complete.

This Mantra is addressed to the Siddhalakṣmīyakṣiṇī, and its repetition is considered to have the power to enable one to accomplish one's desires.

Beginning and **End:**

ऐं कमले कमलधारिणि हं स स्वाहा । स्वगृहे रक्तकरवीरपुष्पपूजान्तरे लक्षजपं कुर्यात् । गुग्गुलुलत्तुकेन दशांशहोमं कुर्यात् ।

ददाति सङ्गमं तस्य तेन चिन्तितरूपिणी ।
चिन्तितार्थं तदा तस्य नात्र कार्या विचारणा ॥

No. 7506 सिद्धलक्ष्मीयक्षिणीमन्त्रः.
SIDDHALAKṢMĪYAKṢIṆĪMANTRAḤ.

Page, 1. Lines, 10 on a page.

Begins on fol. 99*a* of the MS. described under No. 5566, wherein it has been omitted to be included in the list of other works.

Complete.

Same as the above.

No. 7507. सिद्धविद्यामन्त्रः.
SIDDHAVIDYĀMANTRAḤ.

Page, 1. Lines, 27 on a page.

Begins on fol. 230*a* of the MS. described under No. 581, wherein it is found in the Mantramālikā in the list of other works.

Complete.

The repetition of this Mantra is considered to have the power to make even celestial damsels fall in love with the person repeating it duly.

Beginning:

अस्य श्रीसिद्धविद्यामन्त्रस्य इन्द्र ऋषिः, महाविराट् छन्दः, सिद्धलक्ष्मीर्देवता; श्रीं बीजं, शकारश्शक्तिः, श्रीसिद्धलक्ष्मीप्रीत्यर्थे विनियोगः ।

End:

प्रणतजनवत्सले देवि महाकालि कालनाशनि हूं हूं हूं प्रसीद मदनातुरां आं क्रों कुरु कुरु सुरासुरकन्यकां ह्रीं श्रीं (हुं फट् स्वाहा) ॥ ह्रीं नमः श्रीं नमः । चत्वारिंशत्पुरश्चरणं कुर्यात् । दशांशतर्पणहोमः ॥

No. 7508. सिद्धविद्यामन्त्रः.
SIDDHAVIDYĀMANTRAḤ.

Page, 1. Lines, 10 on a page.

Begins on fol. 86*b* of the MS. described under No. 5566.

Complete.

Same as the above.

No. 7509. सीताराममन्त्रः.
SĪTĀRĀMAMANTRAḤ.

Pages, 2. Lines, 14 on a page.

Begins on fol. 46*b* of the MS. described under No. 567[illegible], wherein it is found in the Āmnāyamantramālikā 1*a* in the list of other works.

Complete.

The repetition of this Mantra is considered to have the power to secure for one the favour of Rāma as associated with Sītā.

Beginning:

अस्य श्रीसीताराममन्त्रस्य ब्रह्मा ऋषिः, गायत्री छन्दः, श्रीसीतारामो देवता; रां बीजं, ओं श्रीं शक्तिः, रामायेति कीलकं, मम श्रीसीतारामप्रसादसिद्ध्यर्थे जपे विनियोगः ।

End:

ओं श्रीं रां रामाय नमः ॥

No. 7510. सुदर्शनकवचः.
SUDARŚANAKAVACAḤ.

Pages, 10. Lines, 6 on a page.

Begins on fol. 227*a* of the MS. described under No. 7247.

Complete as found in the Vihagēndrasaṁhitā.

This Kavacamantra is addressed to Viṣṇu's 'discus' conceived as a deity; and its repetition is considered to be efficacious in securing protection to one and in causing the accomplishment of one's desires.

Beginning :

अस्य श्रीसुदर्शनकवचसौत्य(स्तोत्र)महामन्त्रस्य अहिर्बुध्न्यभगवानृषिः, अनुष्टुप् छन्दः, श्रीमान् महासुदर्शनो देवता; सं सहस्रार इति बीजं, हुं महासुदर्शनेति शक्तिः, फट् चक्राडिति कीलकं, सुदर्शनकवचमहामन्त्रमूर्तेः मम सर्वाभीष्टसिद्ध्यर्थे जपे विनियोगः ।

* * * *

मस्तकं मे सहस्रारः फालं पातु सुदर्शनः ।
भ्रुवौ मे चक्रराट् पातु नेत्रे ज्ञे(मे)ऽर्केन्दुलोचनः ॥

End :

बहुनात्र किमुक्तेन यद्यद्वाञ्छति मानवः ।
सकलं प्राप्नुयात्तस्य कवचस्य प्रसादतः ॥

Colophon :

इति विहगेन्द्रसंहितायां तार्क्ष्यनारायणसंवादे अगस्त्यप्रोक्तं सुदर्शनकवचं सम्पूर्णम् ॥

No. 7511. सुदर्शनकवचः.

SUDARŚANAKAVACAḤ.

Pages, 4. Lines, 21 on a page.

Begins on fol. 15*a* of the MS. described under No. 2373, wherein it is given as Sudarśanakavacastōtra in the list of other works.

Complete.

Similar to the above.

Beginning :

अस्य श्रीसुदर्शनकवचस्तोत्रमन्त्रस्य अन्तर्यामिनारायण ऋषिः, अनुष्टुप् छन्दः, श्रीसुदर्शनपरमात्मा देवता; सहस्रार इति बीजं, सुदर्शन इति शक्तिः, चक्राडिति कीलकं, श्रीमहासुदर्शनप्रसादसिद्ध्यर्थे जपे विनियोगः ।

* * * *

मस्तकं मे सहस्रारः पातु फालं सुदर्शनः ।
भ्रुवौ मे चक्रराट् पातु नेत्रेऽग्न्यर्केन्दुलोचन. ॥

End:

इति सौदर्शनं दिव्यं कवचं सर्वकामदम् ।
क्षिप्रं सुदर्शनं चक्रं ज्वालामालाविभूषितम् ॥

* * * *

ऊरुस्तम्भं हनुस्तम्भं निमिषं ज्वल गर्दभाक् ।
तीक्ष्णधार महावेग छिन्धि छिन्धि न वेदनात्(?) ॥

No. 7512. सुदर्शनकवचः.
SUDARŚANAKAVACAḤ.

Pages, 4. Lines, 8 on a page.

Begins on fol. 14*a* of the MS. described under No. 6090.

Complete.

Same as the above.

No. 7513. सुदर्शनकवचः.
SUDARŚANAKAVACAḤ.

Pages, 3. Lines, 6 on a page.

Begins on fol. 12*b* of the MS. described under No. 365, wherein it is given as Sudarśanamantra in the list of other works.

Complete.

Same as the above.

No. 7514. सुदर्शनकवचः.
SUDARŚANAKAVACAḤ.

Pages, 4. Lines, 6 on a page.

Begins on fol. 1*b* of the MS. described under No. 5338, wherein it has been omitted to be given in the list of other works.

Complete.

Similar to the above.

Beginning:

अस्य श्रीसुदर्शन(कवच)स्तोत्रमन्त्रस्य ब्रह्मा ऋषिः, गायत्री छन्दः, श्रीसुदर्शनरूपी महाविष्णुर्देवता, सुदर्शनप्री(त्यर्थे) जपे विनियोगः ।

* * * *

शिरो मे भगवान्देवो रक्षतु श्रीसुदर्शनः ।
फालदेशं चक्रदेवः कालनेमिहरो भ्रुवौ ॥

End:

षट्कोणान्तरमध्यपद्मनिलयं तत्सन्धिदिष्ठाननं
चक्राद्यायुधचारुभूषणभुजं सज्वालकेशोदयम् ।
वस्त्रालेपनमाल्यविग्रहतनुं तं फालनेत्रं गुणैः
प्रत्यालीढपदाम्बुजं त्रिनयनं चक्राधिराजं भजे ॥

No. 7515. सुदर्शनकवचः.
SUDARŚANAKAVACAH.

Page, 1. Lines, 19 on a page.

Begins on fol. 4*a* of the MS. described under No. 2886, wherein it has been omitted to be given in the list of other works.

Complete.

Similar to the above.

Beginning:

(अस्य श्रीसुदर्शनकवचस्तोत्र)मन्त्रस्य अहिर्बुध्न्यभगवानृषिः, अनुष्टुप् छन्दः, श्रीसुदर्शनरूपी महाविष्णुर्देवता ; रां बीजं, स्वाहा शक्तिः, फट् कीलकं, श्रीसुदर्शनप्रीत्यर्थे जपे विनियोगः ।

शिरो मे भगवान् देवो रक्षतु श्रीसुदर्शनः ।
फालदेशं च चक्रेशः कालनेमिहरो भ्रुवौ ॥

End:

नानालोकेषु त्रैलोक्ये नानाशैलवनेषु च ।
नानानदीतटाकेषु जपतां भक्तवत्सलः ॥

* * * *

सुदर्शनचक्राय ज्वालाचक्राय महाचक्राय स्वाहा ॥

Colophon:

सुदर्शन(कवच)मन्त्रःसमाप्तः ॥

No. 7516. सुदर्शनकवचः.
SUDARŚANAKAVACAḤ.

Pages, 6. Lines, 5 on a page.

Begins on fol. 5*a* of the MS. described under No. 6393.

Complete.

The repetition of this Mantra is considered to have the power to destroy all evil-doing agencies and to secure protection to one.

Beginning:

अस्य श्रीसुदर्शनकवचस्तोत्रमहामन्त्रस्य ब्रह्मा ऋषिः, अनुष्टुप् छन्दः, सुदर्शनमहाचक्रो देवता, मम सर्वरक्षक(णा)र्थे जपे विनियोगः ।

सुदर्शनजपं करिष्ये--अथ न्यासः ।

सुदर्शनमहाचक्रो गोविन्दस्य करायुधः ।
तीक्ष्णधात(रो)महावेगः सूर्यकोटिसमप्रभः ॥

त्रैलोक्यरक्षाकर्तृत्वं(त्वात्) दुष्टराक्षसभञ्जन[म्] । ओं सहस्रार हुं फट् स्वाहा ।

End:

राक्षसासुरबेतालपिशाचोरगपाक्षिणः । छिन्धि छिन्धि सर्वभयं चैव ।

* * * *

ज्वालाखेलत्त्रिनेत्रं ज्वलदनलनिभं हारकेयूरभूषं
ध्याये षट्कोणसंस्थं सकलरिपुजनप्राणसंहारचक्रम् ॥

No. 7517. सुदर्शनकवचः.
SUDARŚANAKAVACAḤ.

Substance, palm-leaf. Size, $16\frac{1}{8} \times 1\frac{3}{8}$ inches. Pages, 3. Lines, 6 on a page. Character, Grantha. Condition, slightly injured. Appearance, old.

Begins on fol. 18*a*. The other works herein are Sudarśanaśataka 1*a*, Lakṣmīstōtra 15*a*, Sudarśanaprapatti 17*a*, Sudarśanayantrapūjā 20*a*, Sudarśanamālāmantra 20*a*, Ṣōḍaśāyudhastōtra 21*a*, Sudarśanāṣṭaka 23*a*.

Complete.

Similar to the above.

Beginning:

सिंहासने समासीनं देवेन्द्रं त्रिदशेश्वरम् ।
श्रोतुं चक्रस्य कवचं सुधर्मामगमन् सुराः ॥
देवदेव सहस्राक्ष दैत्यान्तक शचीपते ।
त्वत्तस्सौदर्शनीं विद्यां श्रोतुका(माशा)स्महे वयम् ॥

इन्द्र उवाच—

पुरा भगवतश्श्रीमदहिर्बुध्न्यान्मया श्रुतम् ।
दिव्यं सत् कवचं वक्ष्ये शृणुध्वं सुरसत्तमाः ॥

* * * *

शिरो मे भगवान् देवो रक्षतु श्रीसुदर्शनः ।
फालदेशं तु चक्रेशः कालनेमिहरो भ्रुवौ ॥

End:

इतीदं कवचं दिव्यं सर्वकामफलप्रदम् ।
सर्वपापप्रशमनं महाभयनिवारणम् ॥

Colophon:

इति श्रीसुदर्शनकवचं संपूर्णम् ॥

No. 7518. सुदर्शनकवचः.

SUDARŚANAKAVACAḤ

Substance, palm-leaf. Size, 16 × 1¾ inches. Pages, 2. Lines, 8 on a page. Character, Grantha. Condition, injured. Appearance, old.

Begins on fol. 15*a*. The other works herein are Sudarśanaśataka 1*a*, Sudarśanadigbandhanamantra 12*a*, Sudarśanaṣaḍakṣarīmantra 14*a*, Sudarśanamālāmantra 14*b*, Sudarśanaprapatti 16*a*, Vihagēndrasaṁhitā 17*a*.

Complete.

Similar to the above.

Beginning:

सिंहासने समासीनं देवेन्द्रं त्रिदशेश्वरम् ।
श्रोतुं चक्रस्य कवचं सुधर्मामगमन् सुराः ॥

* * * *

दिव्यमाल्याम्बरधरं भूषणैरुपशोभितम् ।
ध्यात्वैवं चक्रकवचं जपेत्सर्वार्थसिद्धये ॥
शिरो मे भगवान् देवो रक्षतु श्रीसुदर्शनः ।
फालदेशं च चक्रेशः कालनेमिनिबर्हणः ।

End:

इतीदं कवचं दिव्यं सर्वकामफलप्रदम् ।
सर्वपापप्रशमनं महाभयनिवारणम् ॥

Colophon:

इति सुदर्शनकवचं सम्पूर्णम् ॥

No. **7519.** सुदर्शनकवचः.

SUDARŚANAKAVACAḤ.

Pages, 4. Lines, 5 on a page.

Begins on fol. 13*a* of the MS. described under No. 5938.
Complete.
Similar to the above

Beginning:

अस्य श्रीसुदर्शनकवचस्तोत्रमन्त्रस्य अहिर्बुध्न्यो भगवानृषिः, अनुष्टुप् छन्दः, श्रीसुदर्शनरूपी श्रीमहाविष्णुर्देवता ।

शिरो मे भगवान् देवो रक्षतु श्रीसुदर्शनः ।
फालदेशं च चक्रेशः कालनेमिहरो भ्रुवौ ॥

End:

षट्कोणान्तरतारमध्यनिलयं संस्फीतदंष्ट्राननं
चक्राद्यायुधचारुषोडशभुजं सज्वालकेशोज्ज्वलम् ।
वस्त्रालेपनमाल्यविग्रहगुणैस्तं बालमित्रारुणैः
प्रत्यालीढपदाम्बुजं त्रिनयनं चक्राधिराजं भजे ॥

No. 7520. सुदर्शनकवचः.

SUDARŚANAKAVACAḤ.

Pages, 13. Lines, 6 on a page.

Begins on fol. 30*a* of the MS. described under No. 5864.

Complete as found in the Vihagēndrasaṁhitā.

Similar to the above.

Beginning :

अस्य श्रीसुदर्शनकवचस्तोत्रमहामन्त्रस्य अहिर्बुध्न्यभगवान् ऋषिः, गायत्री छन्दः, श्रीमान् महासुदर्शनो देवता; सं सहस्रार इति बीजं हुं महासुदर्शनेति शक्तिः, फट् चक्राडिति कीलकं, सुदर्शनकवचमहामन्त्रमूर्तेः मम सर्वाभीष्टप्रसादसिद्ध्यर्थे जपे विनियोगः ।

End :

यन्त्रे च मन्त्रकवचं पठित्वा सर्वकामधृत् ॥
बहुनात्र किमुक्तेन यद्यद्वाञ्छति मानवः ।
सकलं प्राप्नुयात्तस्य कवचस्य प्रसादतः ॥

Colophon :

इति श्रीविहगेन्द्रसंहितायां तार्क्ष्यनारायणसंवादे अगस्त्यप्रोक्तं सुदर्शनकवचं संपूर्णम् ॥

No. 7521. सुदर्शनगायत्री.

SUDARŚANAGĀYATRĪ.

Page, 1. Lines, 19 on a page.

Begins on fol. 3*b* of the MS. described under No. 2886, wherein the general name Sudaraśanamantra is given in the list of other works.

This Mantra which is addressed to Viṣṇu's 'discus' is in the form of the Gāyatrīmantra, and hence it is called Sudarśanagāyatrī.

Beginning and **End :**

सुदर्शनाय विद्महे(हे)तिराजाय धीमहि । तन्नश्चक्रः प्रचोदयात् ॥

Colophon :

इति गायत्री ॥

No. 7522. सुदर्शनदिग्बन्धनमन्त्रः.

SUDARŚANADIGBANDHANAMANTRAḤ.

Page, 1. Lines, 19 on a page.

Begins on fol. 3*b* of the MS. described under No. 2886, wherein the general name Sudarśanamantra is given in the list of other works.

Complete.

The repetition of this Mantra which is addressed to Viṣṇu's 'discus' is considered to have the power to protect one from the dangers that may possibly come from the various quarters.

Beginning:

ऐन्द्रीं दिशं चक्रेण बध्नामि, आग्नेयीं दिशं चक्रेण बध्नामि, याम्यां दिशं चक्रेण बध्नामि ।

End:

ऊर्ध्वां दिशं चक्रेण बध्नामि, अधरां दिशं चक्रेण बध्नामि, ज्वालाचक्राय नमः ॥

Colophon:

इति दिग्बन्धः ॥

No. 7523. सुदर्शनदिग्बन्धनमन्त्रः.

SUDARŚANADIGBANDHANAMANTRAḤ.

Page, 1. Lines, 8 on a page.

Begins on fol. 14*a* of the MS. described under No. 6180.

Incomplete.

Similar to the above.

Beginning and **End:**

ऐन्द्र्यां दिशि चक्रेण बध्नामि ओं नमश्चक्रराजाय हुं फट् सुदर्शनायामर्षणाय स्वाहा । याम्य - वारुण - कुबेर - ईशान्य - अग्नि - नैरृत्य - वायव्य - ऊर्ध्व - अधर.

No. 7524. सुदर्शनदिग्बन्धनमन्त्रः.

SUDARŚANADIGBANDHANAMANTRAḤ.

Pages, 8. Lines, 6 on a page.

Begins on fol. 5*a* of the MS. described under No. 5822, wherein it is found in the Sudarśanamūlamantra 1*a* in the list of other works.

Complete.

Similar to the above.

Beginning:

अथ दिग्बन्धनमन्त्रः—

ओं नमो भगवते महोग्रदिग्बन्धनसुदर्शनाय अष्टादशबाहुप्रचण्डदश-दिग्बन्धनाय ।

End:

ऐं ज्वालाचक्राय अधःपातालाय दिग्बन्धनाय स्वाहा । ओं दीप्त-चक्राय ऊर्ध्वप्रदेशदिग्बन्धनाय स्वाहा । भूर्भुवस्सुवरों—इति दिग्बन्धः ॥

ध्यानम्—

शङ्खं चक्रं च चापं . . . . सकलरिपुजनप्राणसंहार-चक्रम् ॥

No. 7525. सुदर्शनदिग्बन्धनमन्त्रः.

SUDARŚANADIGBANDHANAMANTRAḤ.

Pages, 4. Lines, 7 on a page.

Begins on fol. 12*a* of the MS. described under No. 7518.

Complete.

Similar to the above.

Beginning:

अथ वक्ष्यामि सौवीरं दिग्बन्धविधिमुत्तमम् ।

इन्द्रादिदशदिक्षु च . . यो मे पुरस्तात् पूर्वभागं गतः पाप्मा वा पापकेनेह कर्मणा इन्द्रस्स देवो राजा जम्भयत्वित्यादि . स्वाहा ।

जम्भयतु स्तम्भयतु जृम्भयतु मोहयतु मारयतु नाशयतु क्लेशयतु शोषयतु कलिं तस्मै प्रयच्छतु कृतं मम शुभं, मम शिवं, मम शान्तिः, मम स्वस्त्ययनं, मम हुं फट् सुदर्शनाय स्वाहा ।

End:

उत्तरस्यां दिशायां महाभीमको नाम श्रीभूतः तस्याष्टकोटिश्रीभूतगणेन दिशं बन्धयामि ॥

Colophon:

इति सुदर्शनदिग्बन्धनविधिस्समाप्तः ॥

श्रीसुदर्शनपुरुषः सुप्रीतो वरदो भूत्वा त्रैलोक्यं रक्ष मां रक्ष । ओं नमो भगवते सुदर्शनाय ज्वालाचक्राय सहस्रार हुं फट् । श्रीसुदर्शनपुरुषाय शत्रुमर्षणाय वीरमायाय नमः ऐन्द्रीं दिशं चक्रेण बन्धयामि एवमेव सर्वा दिशश्च बन्धयामि ॥

No. 7526. सुदर्शनपूर्वोत्तरमालामन्त्रः.

SUDARŚANAPŪRVŌTTARAMĀLĀMANTRAḤ.

Pages, 4. Lines, 8 on a page.

Begins on fol. 1*a* of the MS. described under No. 6090, wherein it is given as Sudarśanamantra 1*a* in the list of other works.

Complete.

The repetition of this Mantra is considered to have the power to propitiate Viṣṇu's 'discus' and to destroy everything which can possibly injure the supplicant, besides securing protection to him

Beginning:

शङ्खं चक्रं च चापं . . . . प्राणसंहारचक्रम् ॥

* * * *

ओं नमो भगवते महासुदर्शनाय महाचक्राय महाज्वालाय महादीप्तरूपाय सर्वतो रक्ष रक्ष महाबलाय स्वाहा हुं फट् स्वाहा ।

अस्य श्रीसुदर्शनमहामन्त्रस्य अहिर्बुध्न्यभगवानृषिः, अनुष्टुप् छन्दः, श्रीसुदर्शनरूपी श्रीमहाविष्णुर्देवता; रं बीजं, हुं शक्तिः, स्वाहा कीलकं, मम श्रीसुदर्शनप्रसादसिद्ध्यर्थे जपे विनियोगः ।

End:

परमन्त्रान् ग्रासय ग्रासय भक्षय भक्षय त्रासय त्रासय परयन्त्रं निवारय निवारय वृश्चिकभल्लूकस्फोटकादीन् नाशय नाशय सर्वं दह दह भस्म भस्म कुरु कुरु चक्रनारायणमहाविष्णवे नमो रक्ष रक्ष हुं फट् स्वाहा ॥

No. 7527. सुदर्शनमन्त्रः.

SUDARŚANAMANTRAḤ.

Page, 1. Lines, 8 on a page.

Begins on fol. 23*b* of the MS. described under No. 124.

Complete.

The repetition of this Mantra is considered to have the power to enable one to accomplish everything which one may desire.

Beginning:

अस्य श्रीसुदर्शनमन्त्रस्य अहिर्बुध्न्यभगवानृषिः, सुदर्शनो देवता, सं बीजं, हं शक्तिः, मम सर्वाभीष्टसिद्ध्यर्थे जपे विनियोगः ।

End:

शङ्खं चक्रं सचापं परशुमसिक(व)रं शूलपाशाङ्कुशाग्रं
बिभ्राणं वज्रपीठं(खेटं) हलमुसलगदाकुन्तमत्युग्रदंष्ट्रम् ।
ज्वालाकेशं त्रिनेत्रं ज्वलदनलमुखं हारकेयूरभूषं
ध्याये षट्कोणचक्रं सकलरिपुहरं(जन) प्राणसंहारचक्रम् ॥

ओं सहस्रार हुं फट् ॥

No. 7528. सुदर्शनमन्त्रः.

SUDARŚANAMANTRAḤ.

Page, 1. Lines, 6 on a page.

Begins on fol. 37*b* of the MS. described under No. 3056.

Complete.

Similar to the above.

Beginning :

अस्य श्रीसुदर्शनषडक्षरमहामन्त्रस्य अहिर्बुध्न्यो भगवानृषिः, अनुष्टुप् छन्दः, श्रीसुदर्शनो देवता; रं बीजं, हुं शक्तिः, फट् कीलकं, श्रीसुदर्शनप्रीत्यर्थे जपे विनियोगः ।

See under the previous number for the end.

No. **7529.** सुदर्शनमन्त्रः.

SUDARŚANAMANTRAḤ.

Pages, 2. Lines, 9 on a page.

Begins on fol. 12*b* of the MS. described under No. 6090.

Complete.

Similar to the above.

Beginning :

एवंगुणविशेषणविशिष्टायामस्यां शुभतिथौ अस्माकं सकुटुम्बानां फलसिद्ध्यर्थं श्रीसुदर्शनदेवतामुद्दिश्य श्रीसुदर्शनदेवताप्रीत्यर्थं सुदर्शनस्तोत्रमन्त्रपठनं करिष्ये—

अस्य श्रीसुदर्शनस्तोत्रमहामन्त्रस्य अहिर्बुध्न्यो भगवानृषिः, श्रीसुदर्शनः परमात्मा देवता; रं बीजं, हुं शक्तिः, फट् कीलकं, मम श्रीसुदर्शनप्रसादसिद्ध्यर्थे जपे विनियोगः ।

End :

लमिति पञ्चपूजां कुर्यात् । मुद्रां प्रदर्श्य, मनुः—

ओं सहस्रार हुं फट् । पुनः न्यासं कुर्यात् ।

* * * *

भगवन् सर्वविजयी सहस्रारापराजित ।
शरणं त्वां प्रपन्नोऽस्मि श्रीकरश्रीसुदर्शन ॥

No. **7530.** सुदर्शनमन्त्रः.

SUDARŚANAMANTRAḤ.

Page, 1. Lines, 18 on a page.

Begins on fol. 325*b* of the MS. described under No. 5477 wherein it is found in the Mantramālikā 273*a* in the list of other works.

Complete.

Similar to the above.

Beginning:

अस्य श्रीसुदर्शनमन्त्रस्य कश्यप ऋषिः, अनुष्टुप् छन्दः, सुदर्शनमहाविष्णुर्देवता; हुं बीजं, स्वाहा शक्तिः, मम इष्टकाम्यार्थसिद्ध्यर्थे विनियोगः ।

End:

ओं ह्रीं सहस्रार हुं फट् । इति ॥

No. **7531.** सुदर्शनमन्त्रः.

SUDARŚANAMANTRAḤ.

Pages, 2. Lines, 5 on a page.

Begins on fol. 64*a* of the MS. described under No. 5885 wherein it is given under the name of Sudarśanaṣaḍakṣarīmantra in the list of other works.

Complete.

Similar to the above.

Beginning:

अस्य श्रीसुदर्शनषडक्षरीमहामन्त्रस्य अहिर्बुध्न्य ऋषिः, अनुष्टुप् छन्दः, श्रीसुदर्शनरूपी विष्णुर्देवता, सं बीजं, हुं शक्तिः, श्रीसुदर्शनप्रसादसिद्ध्यर्थे जपे विनियोगः ।

End:

मनुः—

ओं सहस्रार हुं फट् ॥

No. **7532.** सुदर्शनमन्त्रः.

SUDARŚANAMANTRAḤ.

Pages, 2. Lines, 5 on a page.

Begins on fol. 14*a* of the MS. described under No. 5864

Complete.

Similar to the above.

Beginning:

अस्य श्रीसुदर्शनमन्त्रस्य अहिर्बुध्न्यभगवान् ऋषिः, अनुष्टुप् छन्दः, श्रीसुदर्शनो देवता ; रं बीजं, हुं शक्तिः, फट् कीलकं, श्रीसुदर्शन-प्रसादसिद्ध्यर्थे जपे विनियोगः ।

End:

मनुः—

ओं सहस्रार हुं फट् ॥

No. 7533. सुदर्शनमन्त्रः.

SUDARŚANAMANTRAḤ.

Page, 1. Lines, 21 on a page.

Begins on fol. 17*a* of the MS. described under No. 2373, wherein it has been omitted to be included in the list of other works.

Complete.

Considered also to be efficacious in the destruction of one's enemies.

Beginning:

ओं ह्रीं ह्रीं ह्रीं ह्रीं ह्रूं ह्रूं फट्कारेण ठः ठः द्वयेन हन हन द्विषः

हा हा ह्रू ह्रू हुवित्येव फट्कारेण हन द्विषः ।
सुदर्शनस्य मन्त्रेण ग्रहा यान्ति दिशो दश ॥

End:

ह्राः ह्राः ह्रां ह्रां ह्रां हा हा ह्रू ह्रू हं फट् हन हन द्विषः। स्वाहा ॥

No. 7534. सुदर्शनमन्त्रः.

SUDARŚANAMANTRAḤ.

Pages, 2. Lines, 6 on a page.

Begins on fol. 13*b* of the MS. described under No. 365, wherein it has been omitted to be included in the list of other works.

Complete.

Same as the above.

No. 7535. सुदर्शनमन्त्रः.

SUDARŚANAMANTRAḤ.

Page, 1. Lines, 8 on a page.

Begins on fol. 15*b* of the MS. described under No. 6090, wherein it has been omitted to be included in the list of other works.

Complete

Same as the above.

No. 7536. सुदर्शनमन्त्रः.

SUDARŚANAMANTRAḤ.

Substance, palm-leaf. Size, $10\frac{3}{4} \times 1\frac{1}{4}$ inches. Pages, 3. Lines, 9 on a page. Character, Grantha. Condition, injured. Appearance, new.

Begins on fol. 11*a*. The other works herein are Bhajayatirājastōtra 1*a*, Bhajagōvindastōtra 4*a*, Śukastōtra 7*a*, Bhīṣmastuti 8*a*, Saptaślōkarāmāyaṇa 9*a*, Karṇāmṛta 12*a*, Dvādaśanāmastōtra 13*b*.

Incomplete.

Similar to the above.

Beginning:

देवी गायत्री छन्दः, प्राणायामे विनियोगः ।

त्रिः प्राणानायम्य, सङ्कल्प्य; एवंगुणविशेषणविशिष्टायामस्यां शुभातिथौ श्रीभगवदाज्ञया श्रीभगवत्प्रीत्यर्थं श्रीसुदर्शनमन्त्रजपं करिष्ये ।

अस्य श्रीसुदर्शनमहामन्त्रस्य श्रीवेदव्यास ऋषिः, श्रीमन्नारायणो देवता, सुदर्शनजपे विनियोगः ।

End:

शङ्खं चक्रं च चापं परशुमसिमिषुं शूलपाशाङ्कुशास्त्रं
बिभ्राणं वज्रखेटं हलमुसलगदाकुन्तमत्युग्रदंष्ट्रम् ।
ज्वालाकेशं त्रिनेत्रं ज्वलदनलनिभं हारकेयूरभूषं
ध्याये षट्कोणसंस्थं (सकलरिपुजनप्राणसंहारचक्रम्) ॥

No. 7537. सुदर्शनमन्त्रः.
SUDARŚANAMANTRAḤ.

Pages, 4. Lines, 8 on a page.

Begins on fol. 1*a* of the MS. described under No. 2838.

Complete.

Similar to the above.

The repetition of this Mantra is considered to have the power to safeguard and make effective the repetition of all Mantras

Beginning:

अस्य श्रीसुदर्शनमन्त्रस्य अहिर्बुध्न्य ऋषिः, अनुष्टुप् छन्दः, सुदर्शनो देवता ; रं बीजं, हुं शक्तिः, मम सकलमन्त्रानुष्ठानसंरक्षणार्थं सुदर्शनचक्रेण दश दिशो बन्धा(न्धया)मि । प्राणायामत्रयं कृत्वा ।

End:

हं क्षं हं क्षं हं क्षं हं क्षं आं क्रों आं क्रा आं क्रों आं क्रों ओं कालचक्राय स्वाहा, ज्रं नमः फट् हं नमः फट् फट् फट् कालचक्राय स्वाहा ॥

No. 7538. सुदर्शनमन्त्रः.
SUDARŚANAMANTRAḤ.

Pages, 5. Lines, 6 on a page.

Begins on fol. 7*a* of the MS. described under No. 5819.

Complete.

Considered to have the power to drive off evil spirits.

Beginning:

अस्य श्रीसुदर्शनमन्त्रस्य अहिर्बुध्न्य ऋषिः, अनुष्टुप् छन्दः, सुदर्शनरूपी श्रीमहाविष्णुर्देवता ; स्रां बीजं, हुं शक्तिः, सुदर्शनप्रीत्यर्थे विनियोगः ।

End:

भूतान् निवारय निवारय त्रासय त्रासय हुं फट् स्वाहा ॥

No. 7539. सुदर्शनमन्त्रः.

SUDARŚANAMANTRAḤ.

Pages, 2. Lines, 18 on a page.

Begins on fol. 303*a* of the MS. described under No. 5477, wherein it is found in the Mantramālikā 73*a* in the list of other works.

Complete.

Similar to the above.

The Sudarśanamantras consisting of eight syllables and sixteen syllables are given here.

Beginning:

अस्य श्रीसुदर्शनमन्त्रस्य अहिर्बुध्न्य ऋषिः, अनुष्टुप् छन्दः, ओं बीजं, हुं फट् शक्तिः, सुदर्शनरूपी अहिर्देवता, सुदर्शनप्रीत्यर्थे विनियोगः ।

End:

ओं सहस्रार हुं फट् । द्वादशलक्षपुनश्चरणम् ।
आज्येन दशांशहोमः । तर्पणं द्वादशसहस्रम् ।
मन्त्रः—
ओं नमस्सुदर्शनाय—इत्यष्टाक्षरी । ओं नमो भगवते महासुदर्शनाय हुं फट्—इति षोडशाक्षरी ॥ ओं नमो भगवते नरसिंहाय वज्रकवचाय हिरण्याक्षवक्षोविदारणाय स्वाहा ॥

No. 7540. सुदर्शनमन्त्रः.

SUDARŚANAMANTRAḤ.

Page, 1. Lines, 27 on a page.

Begins on fol. 243*a* of the MS. described under No. 581, wherein it is found in the Mantramālikā 228*a* in the list of other works.

Complete.

Similar to the above.

The Sudarśanamantras containing eight and sixteen syllables and the Sudarśanagāyatrīmantra are found herein.

Beginning:

अस्य श्रीसुदर्शनमन्त्रस्य आहिर्बुध्न्य ऋषिः, अनुष्टुप् छन्दः, ओं बीजं, हुं फट् शक्तिः, श्रीसुदर्शनचक्ररूपी हरिर्देवता, सुदर्शनप्रीत्यर्थे विनियोगः ।

End:

ओं सहस्रार हुं फट् । पुरश्चरणम् १२ लक्षम् । द्वादशसहस्रं होमः सर्षपतिलैः घृतपायसमिश्रबिल्वफलैः । द्वादशसहस्रं तर्पणम् ।

